Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय
कृपया पुस्तक के ऊपर कोई निशान आदि
न लगायें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या.............. आगत संख्या................

पुस्तक – वितरण की तिथि नीचे अंकित है। इस तिथि सहित ३०वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए। अन्यथा १० पैसे के हिसाब से विलम्ब-दण्ड लगेगा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

VIMUKTI

(A Two-Act Philosophical Farce)

with a Sanskrit commentary

BY

Kavikokila Dr. V. RAGHAVAN

(Professor of Sanskrit, University of Madras)

440

with the Foreword of

Prof. UMA SHANKAR JOSHI

(Vice-Chancellor, Gujarat University, Ahmedabad)

published on the occasion of author's

ṢAṢṬYABDAPŪRTI

7, Srikrishnapuram Street, Madras-14

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

विषय संख्या

पुस्तक संख्या

आगत पंजिका संख्या

पुस्तक पर किसी प्रकार का निशान लगाना वर्जित है। कृपया १५ दिन से अधिक समय तक पुस्तक अपने पास न रखें।

tion

Government of India

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पुस्तकालय
Digitized by Arya Samaj Foundation Chennai and eGangotri
गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

पुस्तक-वितरण की तिथि नीचे अंकित है। इस तिथि सहित १५वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए। अन्यथा ५ पैसे प्रतिदिन के हिसाब से विलम्ब-दण्ड लगेगा।

published on the occasion of author's

SAṢṬYABDAPŪRTI

7, Srikrishnapuram Street, Madras-14

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

पुस्तकालय

विषय संख्या

पुस्तक संख्या

आगत पंजिका संख्या

पुस्तक पर किसी प्रकार का निशान लगाना वर्जित है। कृपया १५ दिन से अधिक समय तक पुस्तक अपने पास न रखें।

tion

Government of India

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

VIMUKTI

(A Two-Act Philosophical Farce)

with a Sanskrit commentary

BY

Kavikokila Dr. V. RAGHAVAN

(Professor of Sanskrit, University of Madras)

with the Foreword of

Prof. UMA SHANKAR JOSHI

(Vice-Chancellor, Gujarat University, Ahmedabad)

published on the occasion of author's

ṢAṢṬYABDAPŪRTI

7, Srikrishnapuram Street, Madras-14

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

८८,२२९

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ विमुक्तिः ॥

(द्व्यङ्कम् आध्यात्मिकं प्रहसनम्)

CHECKED 197
Initial

'कविकोकिल'-'सकलकलाकलाप'

बिरुदाभ्यां जगद्गुरु श्रीकाञ्चीकामकोटिपीठाधीश्वरैः

श्रीचन्द्रशेखरेन्द्रसरस्वतीश्रीचरणैः शङ्कराचार्यैः अनुगृहीतेन

मद्रपुरीविश्वविद्यालयसंस्कृतविभागाध्यक्षेण संस्कृतप्राचार्येण

डाक्टर् वे. राघवार्येण

सन्दृब्धा तत्प्रणीतटिप्पण्या सहिता

गूर्जरविश्वविद्यालयोपकुलपतीनां प्रसिद्धगूर्जरकवीनां

श्री- उमाशङ्कर जोषी

महाशयानाम् आमुखेन समलङ्कृता

ग्रन्थकर्तुः षष्ट्यब्दपूर्त्युत्सवावसरे प्रकाशिता

७ श्रीकृष्णपुरं वीथी

२१-८-१९६८] मद्रास्-१४ [रू. २/-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

FOREWORD

Dr. Raghavan belongs to the race of research scholars who off and on beguile their leisure hour with artistic activity. He has already to his credit some creative writing in Sanskrit, which by no means seems to be a dead language in this country looking to, over and above his own writings, the detailed account of contemporary writing in it as given by him in the Sahitya Akademi publication "Contemporary Indian Literature".

Dr. Raghavan has tried his hand at plays. Recently he has given exquisite translations of Tagore's *Valmiki-r Pratibha* and *Nati-r Puja*. The renderings in Sanskrit metres of the songs in *Nati-r Puja* are happy and the dialogue has the flavour of daily speech.

Vimukti is an attempt at writing a Prahasana, 'a play with abundant humour'. The humour is mainly at the cost of the hero, a Brahmin, who is married to a shrew and has six sons, each one vying with the others in contributing to the discomfiture of the father. In the end they are taken to the remand-home and educated and get enlisted in the service of the King. The wife also at long last achieves transparent sincerity and is all pleased with him.

The humour is occasioned mainly by the light-hearted frolicsome behaviour of the six sons, whose physical shapes are also caricatured. They are presented as the Hog-Snout, the One with the Elephant Trunk, the Long-Eared One, the Owl-Eyed One, the Itchy One, the eldest being named *Laṭakeśvara*—the Lord of the Lewd Ones, King of the Contemptible Ones. In fact, the other five also are referred to as *laṭakas* in the second Act. The laughter, they provoke, is crude and it reaches its climax when they are shown competing with one another in making advances to two of their mother's sisters who rather encourage them in doing so.

Dr. Raghavan has hit upon the right material for his Farce, for, as David I. Grossvogel observes in '20th Century French Drama', "The Farce remains above all a lusty breath of brutal and pungent reality...It continues to draw elemental themes of physical passions; lust, gluttony, vanity, cruelty, cowardice, avarice." All these passions form the stuff of this Farce.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Dr. Raghavan says in the introduction that even if he seems to just portray the surface behaviour of human beings, caused by each one jesting at another's folly, there is in fact more in the orgy of laughter than meets the eye or the ear. And this is exactly what Farce in modern times aims at. To quote Grossvogel again, "If the original idea of the Farce is to be spectacle, to entertain, it too has come to seek timeless answers and the essential agencies of man. And thus, like tragedy, it now wears the masque...The original caricature which once sought only laughter, now seeks, through abnormality, universal truths; it has become in its own right a valid masque, timeless and impersonal."

It is with the help of allegory that Dr. Raghavan's Farce wears a masque to represent a universal truth.

The allegory does not take long to unravel itself to a discerning eye. The five younger sons are the five Senses and the eldest represents the Mind, and the mother the Nature of the hero, who is no other than the Self-Lord, but is presented, ironically enough, as a virtual slave of the others. When the sons and the mother talk of their house being completely dilapidated, the reference is obviously to the wearing out of the hero's Body. The allegory, though discernible, remains sufficiently veiled so as not to foil concretisation and representation on the Stage.

Despite Croce's categorising Allegory as non-artistic, as one thing engrafted on another, *e.g.*, ivy on a wall, Allegory seems to have earned great popularity both in the West as well as the East. It seems, once you grant it the obvious didactic overtones, it does enjoy some sort of aesthetic validity. In Sanskrit there is a series of allegorical plays, beginning with the *Prabodha-chandrodaya* of Krishna Mishra who flourished in the eleventh century. In English, the miracle-plays can be traced to the eleventh century. By the fifteenth century emerges the morality play of *Everyman*, an allegorical drama.

There is a universality about the approach of all writers of allegory. Compare, for example, the words of *Dāmṣṭrī* (The Fanged One) of this play with those of Death in *Everyman*.

> *Damṣṭrī* :—Today immediately you will have to relinquish that house of yours (*i.e.* body)........ That is the command of our Lord, the owner of all houses.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Death :—For it is God's commandment
That all to me shall be obedient.

Damṣṭrī :—Get ready, for the pilgrimage to the other world. Begin praying to the Lord for your future well-being.

Death :—On thee thou must take a long journey :
....
And look thou be sure of thy reckoning :
For before God thou shalt answer......

The heroes of both the plays very much want to defer the day of reckoning. The Brahmin reminds the impatient *Damṣṭrī* : "Indeed formerly you said 'tomorrow morning'. Everyman tries to even bribe Death and get a day's respite :

"Yea, a thousand pound shalt thou have,
And defer this matter till another day.
"Now, gentle Death, spare me till tomorrow."

Again, the Brahmin discovers that 'the whole pilgrimage is to be done without any companion'. So does Death advise Everyman that he could have in the next world no mediator :

'For, wete thou well, thou shalt make none attournay.'

The Farce was originally devised to interlard (Fr. *farcir*, to stuff) mystery plays with crude laughter, but now it has developed into a form which, even like the morality plays themselves, though of course in its own way, is concerned with the struggle for the soul of mankind.

The happy blend of Allegory with Farce in Dr. Raghavan's *Vimukti* spotlights the tragi-comic predicament in which man usually finds himself in all times and climes. *Vimukti* is the Tragedy of Everyman, but looked at from the point of view of the wise it is nothing but a Comedy or a Farce. "There is in my mind an extraordinary Farce", says Dr. Raghavan's stage-manager in the introduction. "The whole of the world is the comic material of the play.... To the great-souled introvert persons as well as the gods, the witnesses of everything, it is extremely full of humour and entertaining. Oh friend, this whole business is something terrible, or an extremely pathetic Farce". Allyrdice Nicoll refers to 'the intimate relations that exist between tragedy and comedy,' and Grossvogel very aptly traces the source

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of Farce to that of Tragedy : "In the final analysis it is drawn to the same founts as tragedy and therefore removes itself similarly from realism."

In the *Nandi*, the very first, benedictory, verse our poet says: "Triumphant flourishes the laughter, the pity and the sense of wonder on the lotus-like face of the person who is released though living." *Vimukti*, a Farce, has an undercurrent of pathos and has an aureole of the wondrous mystery that life always is. Like *Prabodha-chandrodaya* which aims at *Svātmāvabodham mahah* the illumination which results in the awareness of the Self, *Vimukti* will hold out an attraction to all lovers of Sanskrit drama.

The style is limpid, colloquial, and though full of classical allusions, has modernistic over-tones. The allusions contribute to the humour, *e.g. Ātmā vai patnīnāmnyasi* and the echo of the first line of the *Saundaryalaharī* in *yadi śaktih, bhavān prbhavatu*. The *Īśāvāsya*, *Katha* and *Chhāndogya* Upanishads are jocularly referred to as *Bhāryāvāsya*, *Ṣatha* and *Māndyayogya*. The pathetic admonition of the hero to the heroine '*Raksha vinayam*'—Please observe good manners, when she is about to take him to task in the presence of his friend, lends itself to much humour when one is reminded of the fact that they happen to be the words uttered by Sakuntala when Dushyanta was trying to steal a kiss. The name of the eldest son *Laṭakeśvara* and the description of the other five sons as *laṭakas* is, I think, designed to remind the reader of the medieval Sanskrit Farce *Laṭakamelana-prahasana*.

There are references to the modern times—even to the *Chittavaidya*, psychiatrist, and the shrewd observation that 'Sanskrit is being read' by the moderns just out of cussedness for topsyturvying everything is not quite out of place.

Dr. Raghavan handles the dialogue with considerable ease and the graces of the rich Sanskrit language come always handy to him. The mother asks the eldest son : '*Snātam tvayā*'. Quick comes the answer, '*Snātam tayā*', and gives out the character of the speaker. There is sardonic humour in the hero trying to correct as it were a slip of the tongue on the part of his son by suggesting *vardhate* (increases) in connection with his family, instead of *vartate* (remains). The felicitous expressions '*Śrama evāyam āśramah*' on the part of the heroine

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

and '*prakrityaiva strīṇām adhikāmeva medhām sumedhā vedhā vidadhe*' on the part of the eldest son have humorous overtones.

I must resist the temptation of referring to the number of colloquialisms employed in the dialogue. They lend verve to the language. I hear echoes of modern Gujarati modes and idioms, in fact they must be those of the modern spoken Tamil, in the dialogue. One could even trace some anglicisms: *Na tasya aucitye kāpi pratibhā vartate* and *lālanenaiva tān nihatavatī* seem to be translations of 'she has no genius for propriety' and 'she killed them with fondling (kindness)' respectively.

The apt choice of verbs deserves to be noted, e.g. *vāḍavāyate, kākāyase, budbuditam, pharapharāyate, muṇamuṇāyase,* not to mention *maḍamaḍāyiṣyāmi* reminiscent of Bhavabhūti.

As the play moves to an atmosphere of serenity at the end, the prose speeches seem to rise to a poetic pitch. They contain quite a few lines of *anuṣṭubh*, Sanskrit yielding itself very easily to be cast in that mould. One can pick up a number of illustrations from the last but one and two pages : *Neha saukhyasya vāso'sti* (distantly reminiscent of *nehābhikramanāśo'sti—Gītā* 2-40) *na grāmāntarameva ca.... Vākchhalam nādhigachchhāmi. Mohayanti bhavanto mām...Prevekṣyantīti kalyāṇīm vārtām ....Mahāsattvā svachchhaśīlā bhāryā bhavitumarhati. Aho, bhagini, vismara ....Adya me vacanam kuru.......... Bharturevānukūlyāya...... Yadvā tadvā vidhāsyāmi........ Saumyaprakṛtimāpannā.......*

Lovers of Sanskrit owe no small debt of gratitude to Dr. Raghavan for this short creative piece.

Gujarat University
Ahmedabad
April 30, 1968

UMASHANKAR JOSHI

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

PREFACE

I completed my Sanskrit Honours course in the Presidency College, Madras, in April, 1930. Till December of that year, I was in the Sarasvati Mahal Library, Tanjore, in charge of the new Descriptive Catalogue work of that Library. In 1931 January, I was back in Madras preparing for some competitive examination and also proposing to do Post-Graduate research in the University of Madras under the guidance of my Professor, Mm. Prof. S. Kuppuswami Sastri. The University research scholarship was to come only late in the year. In the meantime, among the things that were going on was the accelerated activity in the field of original Sanskrit writing. There were several circumstances responsible for the numerous pieces of reflective writing which I did in Sanskrit at that time.

The manuscript of the *Vimukti* which was written at one stretch during that period is dated 19th May, 1931. This and the several other Sanskrit compositions, including the other plays *Pratāparudrīya-viḍambana* and *Anārkali* which I wrote shortly after this, were all lying buried in my notebooks. Although the composing of Sanskrit poems, long and short, went on continuously all through my literary career, on the publication side I was concentrating on research work.

When I founded in 1958 the Samskrita Ranga, Madras, for giving a new fillip to Sanskrit drama activity and to create among my students and younger colleagues a lively literary interest in Sanskrit, my shorter plays had to come out of their seclusion. The smaller pieces like *Kāmaśuddhi*, the three playlets in the collection *Prekṣaṇaka-trayī* etc., were played on the All-India Radio, with members of the Samskrita Ranga and others. The *Vimukti* was taken up for actual production on the Stage on the occasion of the Fourth Anniversary of the Samskrita Ranga on 11th December, 1963. It was produced at the theatre at Dharma Prakasa, Madras-7 before a distinguished audience which included, besides friends and lovers of Sanskrit, well known professional actors of the Tamil Stage. The production was received well by the audience as well as the Press.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The original version of the *Vimukti* was somewhat longer and when I took it up for production, I cut out some portions and effected a few minor revisions. The Play as produced was published in the pages of the *Samskṛta Pratibhā* which I have been editing for the Sahitya Akademi, and for the sake of a wider reading public and for the use of those who might like to produce it elsewhere, I am now offering it in the form of a separate book.

In bringing out this play in a separate book form, I have added a Sanskrit commentary to elucidate chiefly the allusions and the double meanings.

I am greatly pleased that my friend the eminent Gujarati poet and writer, at present the Vice-Chancellor of the Gujarat University, Sri Umashankar Joshi, responded to my resquest and contributed a Foreword which has enhanced the value of this Publication. I express my heartfelt thanks to him.

V. Raghavan

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

SYNOPSIS

In this play, in and through incidents of common happening in a miserable household, with a husband in a pathetic plight, domineering wife, unruly sons, unwanted sisters-in-law and sinister mother-in-law, is presented the idea of Soul, overpowered by Māyā, caught up in Matter and harassed by Mind and Senses, yearning for and working out its liberation or *Vimukti*.

The Sūtradhāra, conversing in the Prologue with his Assistant, indicates the underlying philosophical allegory of the play woven outwardly as a realistic farce.

Ātmanātha, an unfortunate Brahman, after his morning austerities, tries to call his sons and wife to find out how the posture of things is in the house, that morning. First comes *Ulūkākṣa* (Owl-eyed), one of his sons, whose chief pre-occupation is woman-gazing. They start discussing about another son *Calaprotha* (whose ever active mouth alternated its activity between eating and gossipping), who had gone early to the market to buy vegetables. Enter another son *Śuṇḍāla* (the Long-nosed) from whom it is learnt that another brother, *Dīrghaśravas* (the Long-eared) had gone to the piper's house to discuss the number of *svaras* in music! The father is vexed with the vagaries of his undisciplined sons and curses their mother.

Enter the wife of the Brahman, *Trivarṇinī* ; enraged at the husband's insinuations, the shrew taunts him, asserts her authority, runs down her husband as innocent of any capacity, and expatiates on how she has to run the whole show of the house. Unable to stand all this, the husband is anxious to leave the house and have some peace in seclusion. The wife swears that so long as her power lasts he cannot leave. She makes references also to her mother, a past master in magic and witchcraft. Whenever her husband says anything critical of the sons or of herself, she flares up.

At this juncture, the eldest (Jyeṣṭha) son, *Laṭakeśvara* (leader of the rogues) comes in with three of his mother's sisters, *Candrikā* (Moonlight) *Śoṇitā* (Blood-red) and *Hastinī* (the Heavy one).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Trivarṇinī welcomes only the latter two and frowns upon the first. Ātmanātha finds the latter two as bad as his own wife and is all the more perturbed by this addition to his overburdened family.

A heated discussion ensues now between the father and eldest son as to how, with their meagre resources and the way the sons were living, they could run their large family. He asks his father to go away as he pleases, and taking over the responsibility of managing the house, calls his brothers and asks each to take to some profession. Each mentions a calling suited to his own self-indulgence. The brothers do not like the substitution of the father's domination by that of the eldest brother. The mother intervenes, and disliking the idea of her beloved children being put to any strain for livelihood, promises herself to conjure up everything required for their maintenance. But then the mother and eldest son find that their 'house' (the Body, *Śarīra*) is in a most dilapidated state and that unless it is repaired, even slight '*vāta-doṣa*' or '*jala-doṣa*' would bring it down completely. It appears that in that *Marīcikā nagara* (mirage city), there was hardly a house which was not liable to fall.

Act II opens with Ātmanātha at the river side, in the evening doing his *Sandhyā*-worship. He recalls to his mind his eldest sister-in-law *Candrikā* and expresses his longing for her and disgust for his wife and the two other sisters-in-law. Now Candrikā comes there to fetch pure *Tīrtha*. But their meeting is momentary as the suspicious wife Trivarṇinī now runs up to that place trying to find out Candrikā. The Brahman hides her in the *Maṭha* nearby. As Ātmanātha and Trivarṇinī are in the midst of another wordy quarrel some citizens who pass by observe them and express their sympathy for the poor man.

Enter now the fierce-looking *Daṃṣṭrī* (*Dharmarāja*) who proclaims that, according to the orders of the Lord of the City (*Svāmī*), the dilapidated houses will be pulled down and the house (*Deha*) of Ātmanātha and Trivarṇinī will accordingly fall early next morning.

Citizens who are passing by are accosted by the perplexed Trivarṇinī who asks them whether there is a *Svāmī* at all, holding authority over their house or City. The Citizens, none of whom has ever seen the *Svāmī*, argue; some deny Him, some infer that there should be somebody like Him, and some affirm that He is.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

In the short time available before he is due to be thrown out of his house by *Damṣṭrī*, Ātmanātha wants to be alone or run away to some other place. His wife continues to harass him. Some citizens console him that when his old house is pulled down, the *Svāmī* Himself would allot a new house to him.

The sons rush in now with unseemly complaints about each other and two of the aunts. *Damṣṭrī* appears on the scene, announces the *Svāmī's* order to arrest the unruly sons and throw the two aunts into the river for their misbehaviour. The arrested sons are to be made to fast and be in servitude to the *Svāmī*.

Ātmanātha is perplexed as to what course he should now take, -to go back to the family, to follow the path shown by one of the citizens to an unknown destination of supposed happiness or to fall into the river. As he is about to take to the last course, an old man, *Vṛddha*, from within the nearby *Maṭha*, hastens to prevent him and gives salutary advice to him. He diagnoses *Ātmanātha's* mental delusion as due to the influence of his sinister mother-in-law Māyāvatī who exercises her witchcraft unseen, and he mutters a *mantra* into Ātmanātha's ear, a *Mantra* that would kill the mother-in-law and bring his wife on her knees. The *Mantra* works; *Trivarṇinī* rushes, bows down repentent and begs pardon of her husband for her past conduct and asks for her sister *Candrikā* who alone, she now says, is fit to be her husband's wife. The *Vṛddha* reveals himself as *Svāmī*, the Lord, and blesses that with *Trivarṇinī* brought to tranquillity, and made *Prasannā*, *Ātmanātha* might be happy in the company of both *Prasannā* and *Candrikā*, and blesses their new union.

Ātmanātha expresses his gratitude to the Lord and in the *Bharatavākya*, requests the spectators to understand the play as an allegory, that the *Svāmī* is Lord Himself, *Damṣṭrī* is Dharmarāja, *Ātmanātha* the Soul, the House, the Body, the Mother-in-law Māyā, Wife Prakṛti or Primordial Matter, the Sisters-in-law the three Guṇas Sattva, Rajas and Tamas, the Six Sons the Mind and the Five Senses, and Vimukti, the sublimation of Prakṛti.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Plays by Dr. Raghavan

Rāsalīlā

Kāmaśuddhi

Prekṣaṇakatrayī

(Vijjikā

Vikaṭanitambā

Avantisundarī)

Lakṣmīsvayamvara

Punarunmeṣa

'Āṣāḍhasya prathama-divase'

Pratāparudra-vijaya (Vidyānātha-viḍambana)

Anarkali

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

विमुक्तिनाम प्रहसनम्

वे. राघवः

तुच्छेभ्यः स्पृहया प्रपञ्चसरणिष्वापत्य संयुध्यतः
तुच्छालाभविनाशतोऽप्यविरतं दीर्घद्वलं क्रन्दतः ।
अस्मान् वीक्ष्य जगन्महाप्रहसने सश्चेष्टिनो नायकान्
जीवन्मुक्तमुखाम्बुजे विजयते हासो दयाप्यद्भुतम् ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—(नेपथ्याभिमुखं वीक्ष्य)
सखे ! इत आगम्यताम् । अद्य अभिनिनीषामि किमपि प्रहसनम् । तदस्मदीयान् सुहृदः संमेलयतु भवान् ।

सखा · भाव ! साधु निर्णीतं भवता । प्रहसन एवाद्यत्वे महान् गोष्ठीषु आदरः । अथ सर्वत्रैव लोके सर्वेष्वेव विषयेषु खण्ड एव रुचिर्जनानाम् । खण्डमेकाङ्कं रूपकम् , खण्डा कथा, सर्वं खण्डम् ; लघु च ।

सूत्र० ननु काल एवात्र अपराध्यति । विश्वतोऽपि प्रवर्धमाने प्रापञ्चिके वैषयिके कर्मयोगे, निरुच्छ्वासावकाशं व्यवसायिनामाधुनिकानां कर्मठानां सर्वथा नास्त्येव अवकाशः महत् काव्यं नाटकं वा विस्रब्धमुपविश्य पठितुं, प्रेक्षितुं वा ।

सखा · यत्सत्यं दिने दिने कर्तव्यजातं बहुलीकुर्वन् जनो यन्त्रतां गतः । समाचारपत्रिकामात्रविश्रान्तसाहितीसेवः प्रायः परिणतो जनः । तत्रापि हास्यपत्रिकासु विनोदवार्तासु च कुतुकी लोकः ।

सूत्र० एकस्य मौढ्येनान्यः, अन्यस्य मौढ्येनापर इति विनिमयेन परस्परमुपहसन् परमं गाध एष लोकः ।

सखा - स एव गाधो व्यवहारो रङ्गमारोपयिष्यते भवता ?

सूत्र० आम् , आपाततः, न तु परमार्थतः ।

सखा - किमिदं गूढं कूटं च किमपि प्रस्तौति भवान् ?

सूत्र० आम् , अलौकिकं किमपि प्रहसनं मे मनसि वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

सखा - कथमिव ?

सूत्र० अस्य प्रहास्यं वस्तु लोक एव कृत्स्नः । कृतात्मानो विहितमतयोऽस्य सामाजिकाः । पुरुषार्थतया यदेष लोको लिप्सते, यदर्थं सङ्घर्षैर्मिथः पीडयति, कुप्यति, हृष्यति, जुगुप्सते, अलब्ध्वा करुणं क्रन्दति, तदेतत्सर्वमस्माकं परमोदारं नाटकं प्रकरणं वा । एतदेव महात्मना- मन्तर्मुखाणां, सर्वसाक्षिणां देवानां च प्रहसनं विनोदनं च भवति । अहो ! सखे ! प्रपञ्चोऽयं किमपि करालम्, अथवा अतिकरुणं प्रहसनम् । यदाहातिसुन्दरं कविर्भल्लटः—

'एतत्तस्य मुखात् कियत् कमलिनीपत्रे कणं पाथसो
यन्मुक्तामणिरित्यमंस्त स जडः, शृण्वेतदस्मादपि ।
अङ्गुल्यग्रनखक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो हहेत्यनुदिनं निद्राति नान्तःशुचा ॥' इति ।

सखा - एवं च सर्वेऽप्येते नायकंमन्या विदूषका एव ।

सूत्र० प्रेक्षाविशेषनिबन्धनमिदम् । ईदृशस्य महाप्रहसनस्य सन्दर्भणाय वा आस्वादनाय वा गभीरप्रकृतिः, स्तिमितोदारः ऋषिकल्पः कविः, सूक्ष्मं निर्लेपं हृदयमेव च कल्पते ।

सखा - अथ तादृशं प्रहसनं यदि प्रदर्शयिष्यतेऽद्य, तत्कविं ज्ञातुं नूनं सर्वेऽत्र समवेताः कुतूहलिनः स्युः ।

सूत्र० कविस्तु स एव प्रतिभाया अस्याः समुल्लासकः, पूर्वं कामशुद्धि - रासलीला - प्रेक्षणकत्रय्यादिनिरूपितनूतनोल्लेखनैपुणीकः । भवतु, अलं ज्ञातज्ञापनविडम्बनेन । तदेहि, त्वमपि आनिर्वहणं सम्यक् दृष्ट्वा, विचिन्त्य प्रहसनस्यास्य आन्तरमर्थं कथय । एहि, प्रविष्ट एव निर्वृत्तप्रातरनुष्ठानो नायको ब्राह्मण आत्मनाथः ।

(उभौ निष्क्रान्तौ)

(इति प्रस्तावना ।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ प्रथमोऽङ्कः ॥

[तुच्छा काचित् कुटी - प्रविशति वितर्दिकायामुपविष्टो ब्राह्मणः आत्मनाथाख्यः ध्यानाद्धुपरतः किंचिदायासेन इतस्ततः पश्यन्, तारम्]

ब्राह्मणः आत्मनाथः—अरे रे! आगच्छत, आगच्छत । कुत्र भ्रम्यते युष्माभिः ? भोः! शोभना मत्प्रियजातकाः! इत इतः ।

(इति परितो दृष्ट्वा, रथ्यायां पुत्रमेकं पश्यन्)

रे, उलूकाक्ष! किं करोषि तत्र तडागतीरे ?

उलूकाक्षः—(मन्दमुपसृत्य) तात! तत्र तडागे मज्जनैर्विलसन्तीषु कामपि चलापाङ्गां तरुणीम् अलोकयम् ।

ब्रा० अरे! अपि स्नातं त्वया ?

उलू० आम्, स्नातं तया । पश्य, निर्वृत्तस्नाना सा ततो गच्छति । तात! अपि जानासि, केयम्? कस्य गृहिणी ?

ब्रा० (सकोपम्) धिक्, विटभुजङ्ग! पटोलपुष्पं ते नयनं भवतु । अपसर धूर्त! कुत्र ते भ्रातरः? शाकक्रयणाय विपणिं प्रेषितः चलप्रोथः कुतोऽद्यापि नायातः ?

उलू० - तात! क्षमस्व, मन्ये तेन श्रेष्ठिभिः शकटकारैः सहालापरसाद् विलम्बमानेन भवितव्यम् ।

ब्रा० विशिखासु उपवीथिकासु ग्रामकोणेषु च विटचेष्टितानि संग्रहीतुं किं पर्याप्तया गोण्या गतः ? (प्रविशति अपरः पुत्रः, शुण्डालो नाम)

शुण्डालः—तात! न मे भ्रातुः गोण्या अपेक्षास्ति । स स्वशीर्षगोण्यामेव सर्वं सञ्चिनोति । तदस्तु, अपि श्रुतं तात! ह्यस्तनी प्राच्यवीथीवदन्ती?

ब्रा० (निःश्वसन्) धिक् त्वाम्, संवृणु वक्त्रम् । कुत्रैतावत् गतं त्वया? किं न श्रुता मदीया आहूतिः? इयत्या बृहत्या नासयैव स्वीकृतसर्ववदनाभोगस्य ते सत्यं नास्त्येव श्रोत्रावकाशः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

शु० - न, न, तात ! किमेकस्मिन्नेव कुटुम्बे एतावत्श्रोत्रव्ययं कर्तुं पर्याप्तसामग्रीको विधाता? मदीये सहजे दीर्घश्रवसि अतिपक्षपातिनि ब्रह्मणि किमहं करवाणि?

ब्रा० क गतं तेन गर्दभेन?

उलू० - तात ! तं भ्रात्रा चलप्रोथेन विपणिं गतवन्तमपश्यम् ।

ब्रा० परमोऽयं योगः । वाचाटस्य वृत्तिः कुतः स्यात्, यदि सदस्या इमे दीर्घश्रवसो न संमिलन्ति ?

(प्रविशति अन्यस्तनुजः, कण्डूलो नाम)

कण्डूलः - न हि, न हि, भ्रातः ! तात ! चिरादेव भ्रातरं चलप्रोथमुज्झित्वा दीर्घश्रवा रथवीथीमवगाह्य गणिकानुजस्य नागस्वरबहुश्रुतेर्गेहे स्वरसंध्यां प्रति विवदमानः तिष्ठति ।

ब्रा० (स्तंभितः) कथम् ?

कण्डू० - सत्यं, तात । विपण्यां कस्माच्चित् ताम्बूलं गृहीत्वा ब्रह्मपत्रमलभमानः तस्मात् स्थानात् बहुश्रुतेर्गेहं गतः । पितः ! बहुश्रुतेः निकटे अत्युत्तमं ब्रह्मपत्रं वर्तते ।

ब्रा० - (कर्णौ पिधाय) अब्रह्मण्यम्, अब्रह्मण्यम् । अरे ! धूर्ताः ! छेद्या वो जिह्वाः । कृमिगृहं भवेत् वो निर्लज्जं वदनम् । (परिवृत्य) उलूकाक्ष ! किं तत्र कण्डूलेन कर्णयोः मुणुमुणायसे ?

उलू० - (कण्डूलं भाषणचपलम् अपाङ्गेन भर्त्सयमानः) अरे ! वाचाटचटक ! कण्डूल ! तूष्णीं भव ।

कण्डू० - तात! यत्किञ्चिदेतत् । पुंसोः, यूनोः कथा । मा, मा तप्यतां भवान् ।

(अलसालसं हस्तेनैकेन किमपि भक्षयन् स्कन्धेन शाकगोणीं बिभ्रद् प्रविशति चलप्रोथः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रा० - (सकोपमुत्थाय हस्तमुत्क्षिप्य) शठ! कुतस्तवेदम् इयद्विलम्बनम्? मडमडायिष्यामि त्वाम्। (इति तं कर्णे पीडयितुमुपसर्पन् तद्धस्ते विपणिभक्ष्यं किमपि वीक्ष्य, परावृत्य, सशिरस्ताडनमुपविश्य) अहो! धिङ्माम्! आः! चण्डालाः! कुतो युष्माभिः पापिभिः समागतं मम पाताय? स्नात्वा, हुत्वा, जपित्वा, शुचि, प्राणाहुत्यै मयि प्रतिपालयति, अयमेष प्रातरेव गतः, अद्य गगनमध्यमुपसर्पति सवितरि, भक्ष्यापाणिकृतः भक्ष्यमादाय अगणितोच्छिष्टदोषं दशन् आयाति। अरे! कथं लीलामन्थरमेषि? किमद्य चन्द्रिका वर्तते? हन्त! पातितोऽस्मि, पातितोऽस्मि दुष्कुलापुत्रान् प्राप्य।

(प्रविशति तडागतः स्नातार्द्रवसना, शिरसि कट्यां च सतीर्थकुम्भद्वयं गृहिणी। वदनमुन्नमय्य, भ्रुकुटिमाबध्य, सशब्दं करस्थं तीर्थकुम्भं भर्तृशीर्षाभिघट्टनम् अभिनयन्तीव त्रितर्दिकायां विन्यस्य, निःश्वस्य कठोरं वीक्षते। भर्ता कम्पते, नताननश्च भवति।)

भार्या त्रिवर्णिनी - दुष्कुलापुत्रान् प्राप्य! किमर्थम् अविचार्य दुष्कुला परिणीता कुलीनेन त्वया?

ब्रा० - इदं कौलीनमाप्तुमेव, इमांश्च दौष्कुलेयानाप्तुमेव।

त्रिव० - कथं ते धाष्टर्यम् उपर्युपरि जृम्भत एव?

ब्रा० - किमत्र धाष्टर्यम? सत्यमेव उच्यते। को जानाति—शैशव एव कर्मवशात् केनापि पापिना कुतोऽपि त्वया परिणायितोऽस्मि। केन विचारितं कुलगोत्रादिकम्? अथवा किमस्ति विचारयितुम्? अद्य चतुस्सन्धिषु चतुस्सन्धिषु आवामधिकृत्यैव पुराणकथाप्रवचनानि उच्चावचं प्रोच्यन्ते। कुतस्त्वमागता? कस्य महात्मनः त्वां का साध्वी असूतेति को वेत्ति?

त्रिव० - (सधैर्यम् अन्यं घटमपि अधो विन्यस्य वलग्ने हस्तौ निधाय) मात्रा पित्रा च विहीनेति केयं निन्दा मे? मातुर्मायावत्यास्तनूजाया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मे को दोषः? सर्वथा न परिहीयते अस्माकमभिजात्यं युष्मदीयात्। अलं काकः कृकवाकुं विनिन्द्य ।

(इति भर्तारं मूकयित्वा गृहाभ्यन्तरं जलकुम्भावादाय गता)

ब्रा० - अरे! अपशदाः! मा मे अक्ष्णः पुरतस्तिष्ठत ।

चल० - चतुराभिः पत्नीभिरवमानिता एवमेव अपत्योपरि कोपेन स्वपौरुषं पिशुनयन्ति ।

ब्रा० - धिक्! संवृत्य मुखानि अन्तर्गच्छत, सह वो मातृदेव्या पराशक्त्या ।

सर्वे - (मिलित्वा घोरकण्ठम्) कुतो न? सत्यम्, अनुक्तेऽपि तामेवानुसृत्य गच्छामः । सत्यं माता महादेव्येव । मायावतीसुतायाश्च पराशक्तिरिति समीचीनमेवेदं वर्णनम् । अपि च, "जननी जनकान्नूनमुच्चैर्नतु विशिष्यते" इति कथ्यते । 'मातृदेवो भव' इति प्रथमतो मातरमधिकृत्यैव वेदश्च ।

ब्रा० - (सस्मितम्) अहो! कियती स्मृतिर्युष्माकम्! अद्भुतेयं धारणाशक्तिः; यत्पुरा श्रावितमेतत् अद्य स्मर्यते! अरे! रे! कुत्र गतो युष्माकं नायको लटकेश्वरो ज्येष्ठः?

सर्वे - न जानीमः (इति मूढं हस्तमोष्ठं च प्रसारयन्तः पाकशालाभ्यन्तरं गताः।)

ब्रा० - भोः! अयमपरो मे नित्यमृत्युर्जङ्गमो मानुषिकः कुम्भीपाकः, विशृङ्खलो मत्तहस्तीव परिभ्रमन् पापकार्यैस्सर्वं वित्तमपि क्षपयति। महति ऋणार्णवे पातितोऽस्मि अनेन । (किञ्चिद्विलम्ब्य सनिःश्वासम्) कनिष्ठ एव प्रेष्ठः पुत्रो जननीनामिति लोकवादः । अत्र सर्वं विपरीतमेव मद्गृहे । हतया अनया मे गृहिण्या ज्येष्ठस्यैवोपरि अन्यादृशं लालनं समर्प्यते । अहो! न जाने कथमिमे जाता इति। सर्वथा न मदीया इमे........

(अन्तर्गृहात् सरभसमागत्य स्त्यायमानकण्ठा)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिव० - किमिदम् ? अतिगच्छता वयसा जिह्वाधार्ष्ट्यमपि वर्धते । इतः परं यदि एकवारमपि मामपवदन्तं त्वां श्रृणोमि ; ....जागृहि........ भद्रमस्तु ते ।

ब्रा० - (प्रसन्नः) अम्बिके !

नमस्तेऽस्तु महामाये नमस्तेऽस्तु महेश्वरि ।
नमस्तेऽस्तु पराशक्ते नमस्ते विश्वनायिके ॥

देवि ! क्षमस्व । अतिक्रामति मध्याह्नवेला । अद्यापि त्वया न निर्वर्त्तितः पाकः । भवतु, प्रिये! कोपाविष्टेन मया क्रूरमभिहितासि । तन्मर्षय । अन्यादृशम् अस्मदविरहं प्रेम । कियत्कालादारभ्य भवत्या सत्या अनुगम्यमानो गार्हस्थ्ययोगं निर्वर्तयन्नस्मि । अपृथक्-सिद्धावावाम् । "आत्मा वै पत्नीनाम्न्यसि" । ते माता, मे श्वश्रूः, सा जरती मायावती मोहचूर्णेन मां तव दासीकृतवतीति धूर्तालपैः पत्तने परिहसन्ति, परिवदन्ति च । को वा पुरजिह्वां बन्धुं प्रभवति । आवयोः पुनः 'हृदयं त्वेव जानाति प्रीतियोगं परस्परम्' ।

त्रिव० - यत् भवानिह भुवनं भुनक्ति, यदेतत् किमपि ते रूपम् गुणो वा, भोगशक्तिर्वा, सर्वं तन्मदनुग्रहः । स्मरत्वेतद् भवान् ।

ब्रा० - सत्यं त्वयैवैवं व्यवहारेषु आकृष्टः सीदामि । मम पुनर्नास्त्येव यत्किंचित् चेष्टितुमपि रुचिः, दूरे शक्तिः ।

त्रिव० - शूश्, जोषमास्स्व । कोऽत्र त्वद्रुचिं पृच्छति ? यद्यत् आम्लं कटु वा कल्पयामि ते, तत्सर्वं संवृतवदनं भोक्तव्यम् । हठादेव मया तत्र तत्र नियुक्तः कार्यं कुर्वन् भव ।

ब्रा० - सत्यं नैव सहे तदेतत्ते स्वैरसाम्राज्यम् ।

त्रिव० - सहस्व वा, मा वा, नाद्यावधि भारते लोके पाश्चात्ये इव यथेच्छं यदा कदापि विवाहतन्तुविच्छेदः प्रचुरतया प्रवृत्तः । अपि च किमिदं न पर्याप्तं तव—मदीयश्रमेण सर्वमुपभुज्य, कार्येष्वतन्त्रोऽप्यव्यापृ-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

तोऽपि, मयैव सर्वत्र कारितोऽपि, लोके त्वमेव कर्तेति, साधयितेति च महतीं कीर्तिं लभसे ।

ब्रा० - भवति ! क्षमस्व माम् । अहो ! दारुणेयं कीर्तिः । अलमनया । तवैव दास्यामि सर्वं कर्तृगौरवम् । अद्यैव त्वां मोक्तुं प्रयतमानोऽस्मि । अतीव कृच्छ्रं दुःस्थं वर्तते त्वया सह अयं द्वितीयाश्रमः ।

त्रिव० - सत्यं श्रम एवायम् आश्रमः! कथमेवं विश्वजनीनोऽयं भारतदेशे मनोव्याधिः? द्वितीयाश्रमं सर्वे निन्दित्वा ज्ञानीभूतमात्मानं मन्यन्ते । पत्नीप्रेम्णः, अपत्यप्रेम्णोऽपि च परो योगोऽस्ति किम्? तदेतद् भूलोकनाकं गृहमुत्सृज्य वृथा विकृताकारचेष्टितैः पथि शिशून् भीषयन्, बहून् विनोदयन्, सहृदयान् वैरस्येन ह्रेपयन् प्रतिग्रामं शतशः सञ्चरन्ति काषायिणः । अत्र यदि न सिद्धा इमे, कुत्र सिद्धिमवाप्स्यन्ति ? भवतु । यदुक्तं मत्यागमन्तरेण— कस्त्वं मत्यागे प्रभवितुम्? त्वामेषा पिशाचिकेव आविष्टाहं......

ब्रा० - आम्, सत्यमाह भवती—

त्रिव० - श् - त्वां चेष्टयित्वा, अन्ते मदङ्गेषु तान्तेषु, मम अरुचितेषु विलसितेषु, यदि मे मतिः, तदा कदाचित् त्वां स्वयमहं त्यक्ष्यामि ।

ब्रा० - कियतीयमाहोपुरुषिका प्रमदासु अद्य साधारणतया जाता । (जवाद् अपसरणं निरूपयति)

त्रिव० - आः! तिष्ठ । (इत्याकृष्य तम्) मामबलां सहधर्मचारिणीं त्यक्तुमिच्छसि? किं न बिभेषि लोककौलीनात् ?

ब्रा० - (स्तम्भितः) देवि! यदि त्वम् अबला, बलवत्यो व्यक्तयः कीदृश्यः स्युः? नूनम् अद्यैव मया धावितव्यम् ।

त्रिव० - कुत्र, मां त्यक्त्वा कुतः प्रयास्यसि? (धावितुं यतते किन्तु आकृष्ट इव रूपयति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रा० - अहो; मुञ्च माम् । कथमाकर्षति मां कान्तयष्टिरिव लोहखण्डम्! अयि चण्डि, यत्र कुत्र व्रजामि । मुञ्च माम्, त्वया सह त्वत्पुत्रैस्सह च वासात्, अरण्यम्, आत्मघातोऽपि वा वरीयः ।

त्रिव० - (सस्मितम्) (अंसे भर्तारं सानुकम्पं स्पृशन्ती) अरण्यातुरान् आत्मघातकृतनिश्चयांश्च बहून् त्वत्सहोदरान् दृष्टवत्यहम् । अपि च स्मर, अहं मायावतीसुता महाकर्षणमूलमन्त्राचार्याऽहम् । भवतु, अलमनेन कण्ठच्छेदिना नैराश्येन । "जीवन्नरो भद्रशतानि पश्यति" इत्यभियुक्ता वदन्ति । यदि तव स्वतो नास्ति प्रज्ञा, वृद्धानां प्रज्ञापि वा, अस्मादृशीनां प्रज्ञावतीनां भार्याणां वा प्रज्ञा श्रूयताम् ।

ब्रा० - (साटोपम्) भवति! नैतदनुमन्ये । गतासि परां कोटिमविनयस्य । "भर्ता खलु परं नार्या दैवतं दैवतादपि" इत्युच्यते ।

त्रिव० - (तारं हसित्वा चिरम्) किं क्रियताम्! कालमेवैते न जानन्ति । जीर्णं पर्युषितं यत्किञ्चिदुदाहरन्तः हास्याय कल्पन्ते नः पुरुषाः ।

ब्रा० - नैतत् सह्यम् । अद्यप्रभृति अर्थतोऽपि भर्त्रा पत्न्या मया भवितव्यम् ।

त्रिव० - भवितव्यमिति किमर्थं मदीयानुज्ञेव प्रार्थ्यते । यदि शक्तिः, प्रभवतु भवान्, पश्यामि ।

ब्रा० - (परिकरं बध्वा) एष भवामि ।

त्रिव० - अहो तीव्रोत्साहाः पुरुषाः । स्त्रीसन्निधौ तु बाष्पायते सर्वोऽप्येतेषामुत्साहः ।

ब्रा० - पश्य पश्य, एष भवामि ते पतिः । न चेत् किं मन्यत एष धूर्तो वाचाटो लोकः? मां 'भार्याकुम्भदासः' इति सडिण्डिमं प्रकटय्य, विनोदवेलासु मत्कथयैव परिहासैः मुखरीभविष्यन्ति पौराः ।

त्रिव० - (सोदारस्मितम्) भोः तत्त्वतः त्वं भार्यादास्यं न जुगुप्ससे, अपि तु बिभेषि तदन्तरेण लोके कौलीनमात्रम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रा० - (सरोषम्) तिष्ठ, मा मां प्रत्युत्तरय । गच्छाभ्यन्तरम् । गच्छ, अन्तर्गच्छ, गृहकृत्यानि प्रत्यवेक्षस्व ।

(ततः प्रविशति साक्रन्दं सगात्रप्रस्पन्दं चलप्रोथः, उदरं हस्तेन गृह्णन्)

चल० - अम्ब ३ अम्ब ३ बुभुक्षा मदुदरे बाडबायते । एहि, मां भोजय, भोजय ।

ब्रा० - अरे, अद्यैव शाकक्रयार्थं दत्ते रूप्ये अर्धादधिकस्य विपण्यां त्वया तत्तद् भक्ष्यं भुक्तम्। किमुदरे वृकं निबद्धवानसि ? तव भोजनार्थमेव गतभूयिष्ठं मे वित्तम् । एतदपर्याप्तमिव गेहं गेहं श्वेव प्रविश्य भोजनवेलासु काकायसे त्वम । गृध्रस्त्वं वितर्दिकासु बालकेभ्यः सर्वं तद्भक्ष्यम् आच्छिद्य पलायसे । अहो! यदि युष्माकं मातामही सा दग्धा मात्रा सह मोहाभिचारैः युष्मान् पुनः पुनर्हतानपि नोज्जीवयिष्यति, सर्वानेव युष्मान् जिघांसामि ।

चल० - अम्ब, महावीरोऽयं नः पिता । सदैव यदि-बद्धं सन्नन्तप्रचुरमेव च भाषते ।

त्रिव० - (सकोपम्) किमिदं नाम ? किमर्थं त्वं सदैव पुत्रान् निन्दन्नेव वर्तसे । निन्दंनिन्दं त्वमेव यदि स्वपुत्रान् एवं कङ्कालशेषं पञ्जरीकरोषि, किं वक्तव्यं पौरजनविनिन्दाः प्रति ।

चल० - (मातरमालिंग्य) आमम्ब । (इति रोदितुमारभते । तं पटाञ्चलेन प्रमृज्य)

त्रिव० - एहि जात, तिष्ठतु एष ते पिता निर्त्यैकादशीदीक्षः । (इति गन्तुमारभते)

ब्रा० - अम्बिके । सत्यं नाद्य मम एकादशी । किं स्त्रीभिरेव गणितं वः पञ्चाङ्गम् । देव्यः ! यथेच्छं यावत्तृप्ति पृष्ठे ताडयत, मा मा उदरे ।

त्रिव० - (अनवगणितकेन पुत्रं समाश्लिष्य तं प्रत्येव) जात, प्रतिदिनमेष, कुतश्चन चित्तवैद्यात्, आहारत्रिभागविज्ञानं पठित्वा, "एतत्कुरु, एतन्माकुरु, मितं भवतु, हितं भवतु" इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महानसमेव दरिद्रीकृतवान् । (पुत्रमङ्गेषु परिमृश्य) अहो, कथमेतावत्कार्श्यं प्राप्तं ते वपुः ! आगच्छ, अद्य सापूपम् सपायसं सपनसं शर्करा-नारिकेल-आम्ल-तिलादिचित्रान्नैश्च यथेच्छं त्वां तर्पयामि ।

ब्रा० - (साश्चर्यस्तम्भम्) अयि ! किमिदं कथ्यते ! किमुच्यते !

त्रिव० - (अनाकर्णितकेन) अयि जात ! भगवत्याः पार्वत्या यावत् लम्बोदरे प्रेम ततोऽप्यधिकं खलु मे त्वयि ! एहि (इति सुतमालिङ्ग्य अन्तर्गन्तुं चलति, भर्ता अनुधाव्य तां पटाञ्चले गृहीत्वा)

ब्रा० - भवति ! किं प्रपञ्च्यते भवत्या ? कोऽयमुत्सवोऽस्मद्गृहे ? नैव एतादृशसन्तर्पणाय पर्याप्तो विभवोऽस्त्यस्माकम् ।

त्रिव० - (झटिति परिवृत्य) तदेव खलु पुनः पुनः कथयामि । कथम् इयत् महत् कुटुम्बम् अल्पवित्तेन त्वया धार्यताम् । गच्छ, यथा तथा वा धनमाहर । धनेन खलु जीविनो नरभस्त्रिका इति कर्णयोः प्रतिदिनं, प्रतिहोरं, प्रतिनिमिषं च (इति हस्तेन भर्तृशिरसि अभिघट्टनमभिनयन्ती) उपादिशम् । न केवलमहं, तव ज्येष्ठकुमारोऽपि एवं कतिवारं त्वां बोधयतु । मन्ये, वार्द्धकात् ते बधिरीभूतं श्रोत्रम् ।

ब्रा० - नैव ; बधिरं, गाढबधिरमपि ते नाराचवाचः प्रविध्य कर्णं प्रवेक्ष्यन्ति । भवतु, अद्य चिरात् नालोक्यते ते सीमन्तकुमारः ! क्व स प्रेषितः ?

(ततः प्रविशति तिसृभिः स्त्रीभिः सह ज्येष्ठः लटकेश्वरः । त्रिवर्णिनी सानन्दं प्रत्युद्धावति । तासु द्वे गाढमालिङ्गति, अन्यां कठोरं दृष्ट्वा नोपसर्पत्येव । भर्ता पुनः स्तब्धः पृष्ठे तिष्ठति शून्याननः । अनालिङ्गिता स्त्री न किमपि भाषमाणा दूर एव तिष्ठति ।)

त्रिव० - भगिन्यः ! स्वागतम् । सहजाः स्वागतम् । स्वगृहा एव वो मद्गृहाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

भगिन्यौ - (द्वितीयतृतीये)—त्वत्तोऽनपराः स्मः । त्वमेव वयम् । वयमेव त्वम् । 'वयं त्वमसि' इति महावाक्यमपि श्रूयते । न कोऽपि त्वाम् अस्मांश्च पृथक् व्यवहरन् लोके बुद्धिमान् मतः । अप्ययमेव त्वदीयः पुरुषः इति कथ्यते ? अपि स्वकौशलेन पुरुषमेनं स्वभावक्लीबं, योग्यतां दत्वा तत्र तत्र कार्येषु नियोजयन्ती विजयसे ? नैतदपि प्रष्टव्यम् । महाप्रभावा खलु त्वम् । वस्तुमात्रं त्वत्कल्पितमेवेति केचन स्तुवन्ति ।

त्रिव० - (सस्मितम्) आम् आम् । मातुः विश्वमोहिन्याः मायावत्याः खलु पुत्र्यो वयम् ।

भगिन्यौ - युज्यते । सन्त्यस्माकं मातृशिक्षया परम्परागताः कुलविद्याः । अस्माभिः असदपि सत्तया प्रकाश्यते, सच्च शून्यमिति निगूह्यते । आथर्वणिक्यः खलु वयम् ।

त्रिव० - इमे नः पुत्राः ; ज्येष्ठमेनं जानीत । अणुरूपोऽपि महाव्यापकोऽयम् इति कृत्वा युष्मान् इह आनेतुम् अमुं प्रैषयम् । अयमत्र द्वितीयः पुत्रः मदीयः चलप्रोथाभिधानः । (परितः पश्यन्ती) कुत्र अन्ये ते भ्रातरः ?

भगिन्यौ - अलं श्रमेण । अलं निवेदनविडम्बनैः । त्वत्तः अनितरा वयम् । त्वदीयं सर्वमेव जानीमः । तत्त्वतः, यत्ते तत् अस्माकमपि । तथा श्रुतं शठे, मान्द्ययोग्ये च उपनिषत्सु ।

त्रिव० - आम्, भार्यावास्ये च श्रूयते—

"यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्वं व्याप्य भार्या विचेष्टते ॥"

(एतावत् विस्मितं स्थितवान् ब्राह्मणः, अधारयन्नात्मानं, पुरतः प्रकटमागत्य, भगिनीः वीक्ष्य, पत्नीं करेण वारयन्)

ब्रा० - का यूयमत्र, अनिवेद्य मे भर्तृभूतस्य स्वकीयमिव गृहं विस्रब्धं प्रविशथ ? यूयं स्तेनजातीया इति प्रतिभाति मे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीया भगिनी - अयि ! कथं मृगमेनमूढासि ?

तृतीया भगिनी - भगिनि ! कथं त्वमपि भर्तारमेनम् एतावत् भाषितुमपि अनुजानासि ? यदि द्वौ पुमांसौ एवं भाषितुमारभेते, तदा नूनमस्माकं विप्लवमहमाशङ्के ।

द्वि० भ० - (सोदारहासं ब्राह्मणं वीक्ष्य) यदि सत्यं श्रोतुमिच्छसि, सर्व एवैष लोकोऽस्मदीयः । इदं गृहमपि अस्मदीयमेव । वयमेतद्गेहम् अरचयाम । त्वमेवात्र चोर इव प्रविष्टः ।

त्रिव० - (भगिनीः विलोक्य) भगिन्यः! भवतु, क्लीब एष एवमेव प्रलपनशीलः । त्यजतैनम् , अन्तरागच्छत ।

(इति सर्वा अन्तः प्रविशन्ति । इयत्कालं मूकं स्थिता प्रथमभगिनी मन्दं मन्दं परिवृत्य ब्राह्मणमालोकयन्ती गच्छति ।)

ज्येष्ठः - (स्वशिरसि कपोलयोश्च करं विनिमयेन विन्यस्य उपविष्टं पितरमुपसृत्य) तात ! अभिवादये ।

ब्रा० - 'मौढ्यान्मौढ्यात् संभवसि' ! 'मौढ्यं वै पुत्र नामासि' ! (इति निर्भर्त्स्य) वत्सहतक ! शीघ्रं त्वां मरणं प्राप्नोतु । (इति ऋक्छन्दसा आशास्य) अरे! कुतस्त्वया इमाः तिस्रः स्त्रियः समानीताः ? अप्यनलम् एका स्त्री रौरवाय ?

ज्येष्ठः - पितेति वन्दनार्हणां तेऽद्य कर्तुं नानुमनुते ते प्रज्ञावैकल्यम् । अहो! स्त्रियं विना कोऽयं लोकः ? केवलं स्थूण एवायं सुन्दरीपादसंपर्कमात्रतः समुत्फुल्लतां गतो लोकः ।

ब्रा० - आम् , त्वं स्थूण एव, प्रतिदिनं कस्या अपि पादताडनं च अनुभवसि ।

ज्येष्ठः - शृश् शृणु, अहं पुनः मन्ये, जीवस्य प्राणानामेव धारणधातुरेकः इयं प्रेयसी, इदं सुन्दरीप्रेमेति च । ता विना निर्गन्ध एव प्रपञ्चः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

"स्त्रिया पूर्यते" "सोऽकामयत" "तदेकाकी न रमते" इति श्रुतिश्च बहुधा प्रलपति ।

ब्रा० - अयि प्राज्ञ ! कुत्र त्वया अधीतम् ?

ज्येष्ठः - (उपहस्य) अध्ययनमध्ययनमिति यत्कदाचित् पुरा लिखितस्य कण्ठपाठः स पर्युषितः क्रमः नाद्य विपुलीभूतविज्ञाने काले सभ्यतां स्पृशति । "स्वरसतः मतेः प्रवृत्तिः, प्रातिस्विक एव चित्ताशयः धैर्येण धृतः, अन्याशयाकल्माषितः नः प्रमाणम् । यदाह पुरातन्यपि स्मृतिः "आत्मतुष्टिस्तथैव च" इति ।

ब्रा० - अहो ! अनर्थाय सर्वविप्लवायैव आधुनिकैः संस्कृतं पठ्यते !

ज्येष्ठः - तात ! यूयं चिराय अर्थमजानन्तः, केवलं भेका इव पठन्तः, विपरीतविकृतार्थान् तत्र तत्र प्रमाणगन्धाभावात् वदथ । आधुनिकास्तु विमृश्य सर्वं युक्तियुक्तं विचारयन्ति ।

ब्रा० - यत्तु कूलङ्कषविश्वप्रमाथिसर्त्रावगाहिस्वाच्छन्द्यैः युष्माभिः 'आत्मतुष्ट्यादि'स्मृतयः उदाह्रियन्ते, तन्मन्ये, स्पष्टं भणामि, त्वं त्वदभिप्रायिणोऽन्ये च शठाः कौक्कुटिकाश्चेति । अन्तः कामः, बहिः शुभ्रो वेदवादः । न सत्यं स्पष्टमङ्गीकर्तव्यम्, पैर्वा वक्तव्यम् । पर्यायोक्त्यलंकारेषु विलसितव्यम् । एषा अधुना सभ्यता ।

ज्येष्ठः - सुष्ठु, सुष्ठु, तात ! अहह (साट्टहासं) सर्वथा नष्ट एवासि इति प्रतिभाति मे । तदसंबद्धप्रलापैर्मा माम् अन्यत्र आकर्षय । अद्य किमुच्यते, कुटुम्बमिदमस्माकं महत् पोष्यं वर्तते ?

ब्रा० - वर्धत इति वक्तव्यम् ।

ज्येष्ठः - (सकोपम) वृद्धाः सुलभकोपा इति सुष्ठु उच्यते । परन्तु नैव किमपि अद्य कोपविजृम्भितैः प्रयोजनं पश्यामि । नाहम् एताः स्त्रियः अत्र आनयम् । मातुराज्ञा, मातामह्यादेशश्च अनुसृतो मया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रा० - अहो ! मातृवाक्यपरिपालने काश्यपा यूयम् !

ज्येष्ठः - अलं पुनः पुनः पुराणकथाभिः । इमाः स्त्रियः त्वद्भार्याया अपृथक्-सिद्धाः । इहैव त्वद्भार्ययैव सह पूर्वमेव ताभिः भवितव्यमासीत् । मातामही मामाह—"त्वं पुनः कामुकः प्रथममेव तस्याः सुताः चतस्रोऽपि परिणीतवान्" इति । किं सत्यमिदम् ?

ब्रा० - हन्त ! किमिदं प्रस्तूयते ? अहो ! न सहे न सहे । नैव शक्नोमि । नास्ति मे कापि शक्तिः ।

ज्येष्ठः - तत्तु स्फुटमेव ।

ब्रा० - मुञ्च माम् एकाकिनम् । कैवल्यं किंचिदनुबुभूषामि एकान्तमेत्य । यथा तथा वा स्वच्छन्देन त्वं कुरु कुटुम्बव्यापारम् । सर्वथा हतोऽस्मि पुत्रहतकैः ।

ज्येष्ठः - अद्य प्रतिभाप्यस्ति तव ? तथा भण । पुरुषोऽपि त्वमपौरुष इति मात्रा सुष्ठु उच्यते । यत्र कुत्र कोणे भव । वयं सर्वं करिष्यामः ।

ब्रा० - अब्रह्मण्यम्, अब्रह्मण्यम् ! कदा वा इदं गृहं त्यक्त्वा निर्वृतो भविष्यामि ।

ज्येष्ठः - अद्य तावत् क्षणं यतः कुतश्चिदपेहि ।

(निष्क्रान्तः पिता ब्राह्मणः)

अरे चलप्रोथ ! उद्धृकाक्ष ! शुण्डाल ! दीर्घश्रवः ! कण्डूल !

(अनुजाः समाधावन्ति, ज्येष्ठं परिवार्य च तिष्ठन्ति)

अरे ! धूर्ताः ! किं जानन्ति भवन्तः पितुर्दारिद्र्यम् ! इतः परमेवं स्वेच्छया धनं पापेषु व्यययितुं नास्ति अस्माकं विभवः ।

चल० - भोः कियद्वा पित्रा अस्माकं दत्तम् ? प्रातिवेशिकसुतस्स प्रतिदिनं मधुराणि भक्षणान्येव अर्धरूप्याय गिलति । अहं पुनर्न आणकायापि । तथापि घस्मर इति पितरि भर्त्सयमाने त्वमपि कृपणेन पित्रा सह संमिलितोऽसि मां निन्दितुम् !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कण्डू० - भ्रातः ! एवमेव ज्येष्ठः अनुजान् गुरुवत् तर्जयित्वा पीडयित्वा स्वव्ययाय पर्याप्तं धनं लभेत । इदं कनिष्ठत्वम्, अहो ! सत्यं मृतिरेव मे । मीनराज्यं सर्वम् ! अहो सर्वं मीनराज्यम् !

ज्येष्ठः - अरे चलप्रोथ ! को वा त्वां हस्तिनं गृहे निबध्य भोजयितुं प्रभवेत् ! नाद्यापि भुक्त्वा क्षालितः पाणिः, सद्य एव क्षुत् क्षुत् इति त्वं क्रन्दसि ।

कण्डू ० - तद्भवतु । ज्येष्ठभ्रातः ! अद्य दक्षिणवीथ्यां कोणगृहे काचित् नूतना आगतेति श्रूयते । तां त्वं परिणेष्यसीति किंवदन्ती प्रचलिता । अपि तत्तथ्यम् ?

दीर्घ ० - अहो ! शिशोरस्य धाष्ट्र्यं, यज्ज्येष्ठमपि एवं पृच्छति !

ज्येष्ठः - वाचाट ! तूष्णीं भव । कथं नास्त्येव अस्मिन् काले गुरून् प्रति विनयः ! तूष्णीं भवत । अद्य युष्माकम् उदरहोमार्थं एतद्बृहत्कुटुम्बभरणार्थं च मार्गमभजन् पिता मयि तं भारं निक्षिप्य यथारुचि क्रियतामिति अनुज्ञाय गतः कुतोऽपि । तदद्य मदीयमिदं शासनम् - युष्माभिः सर्वैः काचित् वृत्तिः स्वीकार्या, धनम् अद्य अत्यावश्यकम् ।

चल० - अद्यत्वे अतीव दुर्लभा खलु वृत्तिः, विशिष्य ब्राह्मणानाम् ।

कण्डू० - ज्येष्ठ ! क एष अन्धः अस्मानपि 'ब्राह्मण' इति आह्वातुं धाष्टर्यं बिभर्ति ?

चलः - ज्येष्ठ ! पश्य, पश्य, पिता श्रेष्ठिपाठशालायां वर्षाभेकैस्तैर्वटुकैः सह वेदः पठ्यतामिति मां निन्दति ।

दीर्घ० - आम् आं, पितुः न कदाचिदपि अस्मत्कुलगौरवादिकमन्तरेण गणना वर्तते । मामपि 'सकण्ठोऽसि, दास्याःपुत्रेभ्यः त्वया गीतमधीतमिति कथयसि, मार्गशीर्षहरिभजनगोष्ठीं प्रविश । प्रातः कल्यवर्तायापि तत् कल्पेत' इति निर्लज्जमाह ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्येष्ठः - तदास्ताम् अस्मत्पितुः निर्लज्जत्वम् । न तस्य औचित्ये कापि प्रतिभा वर्तते ।

शुण्डा० - आम् आं, सोऽयम् अस्मद्गुरुषु सर्वेष्वेव साधारणीभूतो दोषः ।

ज्येष्ठः - (किंचित्स्वयं कपोले ताडित इव) मामपि स देवालये भगवत्कैङ्कर्यं स्वीक्रियतामिति अवदत् । तदास्तामेतत् । अद्य कथयत अस्माकं गौरवम् अनुपक्लेश्य युष्माभिः प्रत्येकं कापि समुचिता धनार्जनवृत्तिः आदरणीया । किं ब्रूत ?

चल० - ज्येष्ठ! अहं भक्षणापणिको बुभूषामि । उदग्वीथ्यां नैव एकोऽपि भक्षणापणः । तत्र वृत्तिर्नूनं वर्धिष्यते ।

ज्येष्ठः - स्वचापल्यं स्वैरमनुभवितुमद्य सर्वे अनुकूलवृत्तिव्याजं मार्गयन्ति । तदस्तु । अरे! किं त्वं विक्रीय जीविष्यसि? आत्मार्पणानन्तरं विक्रयाय किमवशिष्टं स्यात्?

उलू० - अहं पुनः नाटकशालायां यवनिकाकर्षणमेव स्वीचिकीर्षामि ।

शुण्डा० - धिक् युवां कुलकलङ्कौ । ज्येष्ठ! अहं शोभनायै वृत्त्यै स्पृहयामि । गान्धिकः स्यामिति महती मे वाञ्छा ।

कण्डू० - आं सा खलु शोभना वृत्तिः । किन्तु शुण्डाल-भ्रातः, तत्र ततोऽपि उचितं गौरवाय च भवेत् नासाचूर्णापणस्थापनम् ।

सर्वे - ज्येष्ठ ! ज्येष्ठ !

ज्येष्ठः-मन्दं भणत । एकैकं कथयत । नाहमेकपद एव सर्वानपि वः श्रोतुं पारयामि ।

चल० - अस्मदीर्घश्रवःश्रोत्राद् एकदेशः स्वीक्रियतां भवता ।

(ततः प्रविशति सरभसं ज्येष्ठमाह्वयन्ती)

त्रिव० रे अलं ते पितेव त्वमपि वृत्त्यर्थं दारकान् पीडयित्वा । अलं वृत्त्यन्वेषणेन । सर्वमहमुपकल्पयिष्यामि वः । किं नाहं मायावत्याः सुता । मैवास्तु अस्माकं विभवः । शून्येऽपि स्थाने मच्छक्त्या बहु बहु समुद्भावयितुं प्रभवामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शुक्तीः करिष्यामि किमङ्ग रूप्या-
ण्याहोस्विदेतैरपि रूप्यकैः किम् ।
आकाशगङ्गासिकतासु कुर्या-
मत्युच्चगन्धर्वपुरीर्व एषा ॥

तद्यावदहं जीवामि, तावद्युष्माकं मास्तु तिलशोऽपि चिन्ता । गच्छत गृहाभ्यन्तरं जातकाः । तत्र भवदर्थे प्रथितानि वर्तन्ते पत्राणि, स्वैरं भुज्यताम् । (पश्चापि सुताः निष्क्रान्ताः)

ज्येष्ठः - अम्ब ! वृत्तिभिः धनोपार्जनं विना किं वयं करवाम ? तातः परं निश्चिन्तम् आस्ते ।

त्रिव० - आस्ते ! क्व ? गतः खलु सः !

ज्येष्ठः - पश्य नो गृहम् । कथमत्र एतावज्जीर्णे वेश्मनि जीवामः ?

त्रिव० - आम् तात ! एकान्तरन्ध्रमिदं गृहम् । मृन्मय्य इमे भित्तयश्च तत्र तत्र वर्षाधिक्यात् ध्वस्ताः । गृहं प्रथमतः सुष्ठु संस्क्रियतामिति बहुशः उपादिशं ते पित्रे । स तु अद्य कंचित्कालमारभ्य मय्युदासीन इव, स्वीकृतगाम्भीर्याविपत्य इव व्यवहरति । नूनं ग्रामे कोऽपि सखा तं दुरुपदेशैः दूषितवानिति मन्ये । सर्व एवैषः अनर्थापातः भर्तॄणां भार्योपदेश-अनाश्रवत्वादेव संभूतः ।

ज्येष्ठः - आमम्ब ! निपुणा भार्या यद्यनुसृता तत्र को दोषः ? लज्जत एष दुराग्रहः पुंलोकः । प्रकृत्यैव स्त्रीणाम् अधिकामेव मेधां सुमेधा वेधा विदधे । एतावत्पर्यन्तम् इमे पुमांसः स्वयमेव सर्वत्र वरिष्ठाः कुशला इति च व्यवहरन्तः स्त्रीलोकमेव अगणितेषु कोणेषु क्षिप्त्वा निर्भर्त्सयन्ति स्म । अद्य त्वया त्वादृशीभिश्च परिणतप्रज्ञाभिर्मिलित्वा स्त्रीस्वाराज्यार्थम् उद्यमः कृत इति महान् प्रमोदो मे ।

त्रिव० - सत्यमाह मे दारकः । अस्मासु अधीनेयं सृष्टिरेव । यदाहुः पुरातना अपि -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि" । इति ।

ज्येष्ठः - साधूक्तं त्वया ! मम तु सदैव स्त्रियः महते गौरवाय कल्पन्त इत्येत्र चिरायैव मतम् ।

त्रिव० - जानामि वत्सस्य स्त्रीचापल्यम् । तद्भवतु । गृहम् इदं प्रतिनिमिषं पतिष्यामीति तर्जयति । भर्ता पुनः बाधिर्यं नाटयति । यदि निर्बन्धेन पृष्टः तदा औदासीन्येन वदति—"के वयमेतत्सम्यक्कर्तुम् ? सदैव पतयाल्वेव सर्वं गृहम् । किं त्वं नापश्यः पूर्वाणि नो गृहाणि । न कुत्रापि एतस्माद्विशिष्टं भद्रं गृहं लभ्येत । यत्सत्यं नास्त्येवास्यां मरीचिकानगर्याम् अरन्ध्रम् अपतयालु च भवनम् । अपि चात्र प्रवेश एव मां सुहृत् कश्चित् अबोधयत्-'यदा कदा वा अनापृच्छ्य युष्मान् गृहमेतत् पतिष्यति, तत् जागृत' इति । कः पतयालु वारयितुं प्रभवेत् ! किं च, के वयम् अन्यदीयं गृहं परिष्कर्तुं, यदि परिष्कारः शक्य एव । पतत्वेतत्, अन्यद्गृहं गच्छामः । असङ्ख्यानि गृहाणि एतावद् अश्रान्तं मया अध्युषितानि । कुतस्तवैव एतावान् श्रमः ?" इति बहु बहु मुखरायते ।

ज्येष्ठः - जननि, सर्वथा प्रकुपितेव भाति तातस्य मतिः । कैश्चित् वास्तु-पण्डितैः दूषिता तातस्य प्रेक्षा । अहं पुनर्मन्ये गृहं नैव पतिष्यतीति ।

त्रिव० - न हि न हि पुत्रक ! मैवं परमान्धो भव । किं न पश्यसि परमशिथिलीभूतं निकेतनम् । मन्ये यः कोऽपि मृदुरपि जलदोषो वातदोषो वा यदि भवेत् सर्वमेव पतिष्यति नः शरणमेतत् ।

ज्येष्ठः - मातः ! कोऽहं त्वां निषेद्धुम् ? तथापि न मे मतिरेवम् । मम तु मनीषा शाश्वतमिदं धामेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिव० - वत्स ! सत्यं न ते कापि मनीषा । शृणु मद्वचनम् ।

ज्येष्ठः - मातः ! तथापि पतयालु गृहमपि परिष्कार्यमेव । कन्था सन्धायैव धार्या ।

त्रिव० - तत् त्वमेव सर्वमधिकारं स्वीकृत्य परिष्कुरुष्व । तदेहि शीघ्रमेव यावच्छक्ति भुक्तिं वः समापयिष्यामि ।

(निष्क्रान्तौ)

॥ इति प्रथमोऽङ्कः ॥

॥ अथ द्वितीयोऽङ्कः ॥

(सायंकालः - नदीतीरम् - अश्वत्थमूले वेदिकायां संध्योपासनासीनः प्रविशति ब्राह्मणः । उपास्य उत्थाय किंचिदिव उत्सुकः)

ब्रा० - अहो ! शान्तोदारसौम्यता तस्याः ! अहो ! शरच्चन्द्रिकाया इव चन्द्रिकायास्तस्याः लक्ष्मीः ! तदा आगमनदिने, अन्तः प्रवेशे, सा

मन्दं मन्दं लम्बमाना च पश्चात्
व्यावृत्तास्याम्भोरुहं भुग्नकण्ठम् ।
प्रेङ्खद्भावैर्मामपाङ्गैरपश्यत्
शान्तोदारैः स्वच्छपीयूषलक्ष्मीः ॥

ततःप्रभृति तदा तदा संकल्पनेष्वाविर्भूय सामिदृश्यमाना मामत्यन्तमुत्कयति । तामेव वोढुमभिलषामि । अहो नु मम दिष्टक्रौर्यम् ! यद्यादावेव एतादृशी भगिनी मे भार्याया अस्तीति ज्ञातं, तदा तामेव तदैव परिणीय, अद्य कियत् सुखितः स्याम् ? इयं मे चण्डी भार्या परमेर्ष्यालुः कारणादेव तामेतावत् अनिवेद्य मां रक्षन्त्यासीत् । अद्य कथमपि मम भाग्येन तया मद्गृहमायातम् । परं त्वत्यन्तं कोपना मे गृहिणी तस्यां नैव प्रेम्णा व्यवहरति । अन्ये द्वे एव भगिन्यौ विविधैश्चाटुभिः भक्ष्यपेयवर्गैर्लालयति, इमां तु क्षामामपि न केवलं न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गणयति, अपि तु क्रूरं तदा तदा निर्भर्त्सयति च। आगमनदिवसे च नैनाम् आलिङ्गत्। द्वे अप्यन्ये आश्लिष्य ताभ्याम् व्यलुठद्देषा निकामम्। हंहो ! धिक् ते स्त्रियौ पत्नीभगिन्यौ! रुधिरेण निर्मितेव शोणिता एका। अपरा कुहूगर्भोदितेव काली घना च वर्तते, या जृम्भमाणवदन-गुहा निद्राति अनिशम्। पूर्वा शोणिता तु अत्यन्तं मे भार्यायाः प्रियापि, मद्भार्याज्ञानं विना रहसि मां हठात् वशीकर्तुमुत्सहते। चटुलं चेष्टमाना सदैव इतस्ततः सञ्चरन्त्यास्ते।

अकाण्डहासान् कुरुते मुहुश्च
कदाचिदुद्वीक्षत एव धृष्टम्।
इतस्ततः स्रस्तपटं मदग्रे
कार्यं विनैवाभिचरत्यजस्रम्॥

मां पुनश्चन्द्रिकासक्तं स्फुटं नेमा जानन्ति। एकदा तु पीड्यमानायां तस्यां सत्यां चन्द्रिकायां, मयि च तदानुकूल्येन किंचित् विवृतवदने सति, दग्धया मे गृहिण्या मत्प्रेमगन्धः किंचिदिव आशङ्कित इति मन्ये। तदद्य मत्प्रियतमां सा मे भार्या स्वभगिन्या शोणितया सह संमन्त्र्य व्यापादयितुं प्रयतत इति बिभेमि। एतयोः मद्भार्यायाः तद्भगिन्याः शोणितायाश्च साहाय्याय वर्तन्त एव अस्मत्प्रियपुत्रशेखराः। किं कुर्याम्! धिक् मे कष्टं जन्म! (कर्णं दत्त्वा) कथम् अदूरे हंसकशब्द इव! (निरूपयन्) हन्त! फलितमेव मे सन्ध्यावन्दनम्। इत आगच्छति शुद्धतीर्थाहरणाय मे प्रेयसी चन्द्रिका।

(समागतां नम्रवदनां तां दृशा आलिङ्गन्निव) प्रिये! नरककल्पं गृहं विहाय अत्र मनोहरे नदीतीरे प्रत्यहं त्वां प्रतिपालयन्नस्मि। दिष्ट्या अद्य त्वया समागतम्। अत्रैवावयोः मुहुर्मुहुः संकेतो भवतु। प्रिये! अत्यन्तं याचते मे हृदयं त्वत्संगमाय।

(इति तन्मुखं चिबुके गृह्णाति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(नेपथ्ये रभसपदशब्दः, परिवृत्य पश्यन्, पुनश्चन्द्रिकां विलोक्य) अहो! तपस्विनामपि तपस्वी अहम्! कथमत्रापि मामनुगतैवैषा! प्रिये! एषा ते क्रूरा भगिनी मे भार्या समाधावति। यदि मां त्वया सह कराली सा पश्येत्, सत्यं न स्व एव आवाम्। त्वमिमं मठं प्रविश्य निगूढा भव।

चन्द्रिका - तथा। (इति निष्क्रान्ता। ततः प्रविशति सरभसं भार्या त्रिवर्णिनी)

त्रिव० - भर्तारं कठोरं पश्यन्ती) ज्ञायते ज्ञायते! कुत्र सा उपनिषद्भूय चरन्ती मे भगिनिका? अरे! वृद्धब्राह्मणजम्बुक! व्यर्थोऽयं तव आयासः। तपस्विन्! मयि जीवन्त्यां नैव शक्यते तव तया सह रहोजापः। क्षणिकं ते योगं विघटचितुमहमायातास्मि। अलं मौनेन। निष्कासय ताम्।

ब्रा० - त्वमेव निष्कासिता भव। गच्छ, अधमे! निकृष्टे! न सहे त्वाम्। त्वामद्यैव त्यक्त्वा धावितुमातुरोऽस्मि। श्रूयते 'पूरयोध्या' इति, तत्र गत्वा निर्वाणं प्राप्स्यामि।

त्रिव० - धाव यदि शक्तः स्याः। कुतस्तिष्ठसि त्वम्? किं बुद्बुदितः चरणः?

ब्रा० - देवि! न केवलं चरण एव, त्वया सह वसतो मे सर्वमेव गात्रं बुद्बुदितम्।

(ततः प्रविशतः द्वौ पौरौ। तौ दम्पती निर्दिशन्)

एकः - मित्र,! अग्रे पश्य, दीनः स द्विजः कामात् तां तत्र स्थिताम् उदवहत्। तस्य श्वश्रूः मायावतीति यथार्थनाम्नी काचिज्जरत्कुट्टनी वर्तत इव। तया आभिचारेण शून्यमन्त्रेण चूर्णेन दासीकृतोऽयं मूढः, अनया पिशाचिकया भार्यया दोधूयते। एतावच्च न पर्याप्तमिति अद्य गते मङ्गलवारे सेयं तद्भार्या स्वभगिनीः तिस्रः आनाय्य अस्य दरिद्रस्य गृहे निक्षिप्य तदीयमल्पं वित्तमपि यथेच्छं विनियोजयन्ती वर्तते। पश्यैतदनर्थगार्हस्थ्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरः - रे! अलं परपरिवादैः! एहि किमेतेन अस्माकम् । विचारिते, सर्वेषामेवास्माकम् इयमेव कथा । परं तु न कोऽपि तीव्रं तच्चिन्तयति ।

(उभौ निष्क्रान्तौ)

(ततः प्रविशति नीलः कश्चन दंष्ट्री पुरुषः)

दंष्ट्री - अप्यत्र वर्तते ब्राह्मणः कोऽपि तडाकपश्चिमतीरवासी, तद्भार्या वा?

ब्रा० - आम् अस्मि एषोऽहम् (इति वदन्तमेनम् आवार्य, हस्तेन तद्वदनमाच्छाद्य, तं पृष्ठतः कृत्वा, पुरत एत्य, साचि दृष्ट्वा, भर्तारं प्रति)

त्रिव० - तूष्णीं भव । मा मर्यादामुल्लङ्घय । नैव सर्वैरपि व्यावहारिकैः पथिकैश्च भाषणं युज्यते ।

(आगन्तुकं प्रति)

नायं मे पतिः तपस्वी किमपि व्यवहारं जानाति । अहमुत्तरयामि तद्गृहिणी । किमीप्सितं ते? अतीव भीषणाकारं वहसि!

दंष्ट्री - अद्य सद्य एव युष्माभिस्तद्वो गृहम् उज्झितव्यम् । तदतीव जीर्णम् । नात्र नगर्यां जीर्णानि गृहाणि सह्यन्ते नृपतिना । अस्माभिः तदुन्मूलितं भविष्यति । श्वः प्रातः न तत्र तव भर्त्रा भाव्यम् । एष सर्वगृहस्वामिनः अस्मत्स्वामिन आदेशः ।

(इति निष्क्रान्तः)

(स्तम्भितौ दम्पती, चिरात् संज्ञां लब्ध्वा)

त्रिव० - कोऽयम् अस्मद्-गृहस्वामी?

ब्रा० - प्रिये! आमस्ति कश्चित् अस्मद्गृहस्वामी, नगरस्वामी च । कथमेतावच्चतुरयापि त्वया नैतद्विज्ञातम्?

त्रिव० - कथम्? अलं प्रलापैः । सत्यं मत्तो वा आविष्टो वासि । भवतु, गृहं प्राप्ते, लिकुचेन गाढं घर्षयिष्यामि ते शिरः । न किमपि त्वया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञातुं संभाव्यते । तूष्णीं भव । इत एते विज्ञाः पौरजनाः, पृच्छामि तान् ।

(ततः प्रविशन्ति पौराः केचित्)

त्रिव० - (एकं प्रति) अपि अस्मद्गृहस्वामी यः कश्चन वर्तते ?

पौरः - (सकोपम्) धिक् त्वाम् ! को वा त्वां, त्वद्गृहं वा, त्वद्गृहस्वामिनं वा जानाति ?

अपरः - आर्ये ! किं पृच्छयते, एष जानामि । अप्यद्य कतिचिन्निमेषेभ्यः प्राक् "प्रातर्गृहं त्यक्तव्यम्, तत् पतिष्यति" इति वदन् यः कोऽपि कालो दंष्ट्री समागात् ?

त्रिवः - आमार्य ।

अपरः - स प्रतिदिनं तं तं जनमेवं वदन्नेव वर्तते । प्रथमतः तं पौराः परिजहसुः । किंतु यदा अनिच्छतोऽपि स बहून् यथोक्तकाले बलात्कारेण गृहेभ्यः समाच्छिद्य बहिः प्राक्षिपत्, तत्प्रभृति, मन्ये, कोऽपि अस्मद्गृहाणां स्वामी वर्तत इति, तादृशेन केनापि भवितव्यमित्यनुमिनोमि । तस्य भटेन भवितव्यमनेन ।

तृतीयः - यद्येवं स्यात्, तदा स स्वामी परमक्रूरहृदय इति मे तर्कः ।

चतुर्थः - अहं पुनरुत्प्रेक्षे—न स क्रूरः, स कमपि कर्मविधिमनुसृत्य नः गृहेभ्यो नियमेनैव प्रक्षिपतीति । सर्वथा यस्मिन् कस्मिन्नपि स्वामिनि नोपपद्यते खलु वैषम्यं नैर्घृण्यं वा ।

पञ्चमः - धिक् त्वाम् धिक् वः सर्वान् आकाशताण्डवाडम्बरिणः । अद्य स्वामिनः सत्तैव न ज्ञायते । भवन्तस्तु तदीयगुणानधिकृत्य विवदध्वे । युक्तिरनुसार्यते चेत्, नैवास्ति कोऽप्यस्मत्पत्तन-स्वामी । यदि स्यात् कथं नालोक्यते अस्माभिः रथ्यासु यात्रासु ।

षष्ठः - हन्त ! 'आरामकस्य पश्यन्ति न तं पश्यति कश्चन ।'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तमः - भवतु । आगच्छत, सायं कोष्णिम्ना अतीव सुभगेयं नदी । स्नास्यामः, विहरिष्यामः । अथवा श्रोत्रियावतारघट्टोऽयं परमनीरसः । तत्र मज्जन्तीभिः ग्रामप्रमदाभिः संकुले भागे अवतरामः ।

(सर्वे निष्क्रान्ताः)

(ततः प्रविशति कोऽपि सखा, ब्राह्मणं वीक्ष्य)

सखा - अयि सखे ! कुतोऽत्र भार्यया सह स्थीयते ? को विशेषः ?

(भार्या वक्तुं फरफरायते, तां प्रति)

ब्रा० - तिष्ठ त्वं, तूष्णीं भव । रक्ष विनयं, यदि शक्नोषि । (मित्रं पश्यन्) सखे ! परिपीडितोऽस्मि । ग्रामविदितविषयः अस्माकं कुटुम्बव्यवहारः ।

त्रिव० - (भर्तारं प्रति) अहो ! कथं त्वं कुटुम्बकलहानपि प्रकटीकरोषि ?

ब्रा० - (मित्रं प्रति) सखे ! श्रुतं त्वया ? अपि नास्ति कोऽप्युपायः मामेभ्यः पत्नीपुत्रेभ्यः परिरक्षितुम ?

त्रिव० - नृशंसोऽयं कथं मां शिशूंश्च जिहासति ?

ब्रा० - (स्तम्भित इव) कथम् ? शिशवस्ते पुत्राः ? किं पापकर्मण्यपि शिशव एव ते रथ्योदाहृतापदानाः सुताः ?

सखा - (ब्रा० प्रति) अलं कोपेन । गृहं पत्नीं पुत्रांश्च त्यक्त्वा कुत्र गमिष्यसि ?

त्रिव० - तदेव खल्वहमपि पृच्छामि ?

ब्रा० - मित्र ! स्वयं गृहं त्यक्ष्यामीति चिन्तयन् मा तप्यतां भवान् । श्वः प्रातः नूनं बलात् वयं स्वगृहात् निर्वास्यामहे । किं भणति भवान् ? अहमेक एव अद्यैव पलायितुं वाञ्छामि ।

त्रिव० - यदि शक्नोषि ।

सखा - सत्यमाह सहधर्मचारिणी ते । सेयं सपुत्रा त्वां यद्यपि नानुगमिष्यति, स्वयमपि वा एका नूनं नैव त्वां मोक्ष्यति । सर्वथा दुश्शक एषः अस्या निरासः । किं च, किमर्थं कुतोऽपि उन्मत्तेनेव त्वया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

 Digitized by Arya Samaj Foundation Chennai and eGangotri

पलायितव्यम् ? यथापूर्वम् यथान्येषां तथा तवापि श्वः प्रातरस्मिन् गृहे जीर्णे पातिते, स्वामी दयालुः गृहान्तरं कल्पयिष्यति ।

ब्रा० - मित्र! एतस्या मायावतीपुत्र्या हस्ते पिण्डीकृतोऽस्मि । यदि स्वतन्त्रस्य मे मतिरस्मिन् विषय आद्रियेत, अहं नैव प्रवेक्ष्यामि यत्किमपि गृहम्। न स्वीकरिष्यामि यां कामपि भार्याम् ।

त्रिव० - कथम्? कथं त्वं जीवन्त्यां मयि भार्यान्तरवार्तामुदाहरसि? रे धृष्ट! मां विहाय कुत्र व्रजिष्यसि? भुक्त्यै किं करिष्यसि? अत्यद्भुतपाकविशेषैः त्वामेतावत् प्रीणितवत्या मे सम्यगेवेदं ते कार्तज्ञ्यम्!

ब्राः - सत्यमेव पाकपण्डितासि । परं त्वद्य महत्या शूलपीडया निवृत्तसर्वबुभुक्षोऽस्मि । त्वत्कृतोपद्रवैः सर्वैव क्षुत् नाशिता । यत्रकुत्रचित् भिक्षां चरन् "सत्रे भोजनं मठे निद्रा" इति कालं यापयामि । अतीव श्रान्तोऽस्मि । त्वमपि तैस्तैर्विलसितैर्मत्पुरतो नटित्वा श्रान्तासीति मन्ये । प्रिये! मय्यनुकम्पावत्या त्वया अहम् अद्य,—इतः पश्य, उज्झितव्य एव । अद्य परीक्ष्यते ते सतीधर्मः । त्यज मां, धैर्येण त्यज मां, कल्याणाय मे ।

त्रिव० - कयापि अन्यया सह गार्हस्थ्यमन्यत्र अनुष्ठास्यसि!
(नेपथ्ये कलकलः । आधावन्ति त्रयः पुत्राः, भगिनी शोणिता च ।)

ज्येष्ठः - मातः! परिवेत्तॄन् एतान् किं कुर्याम्? न ज्ञायते किं वा कीदृशं वा कियद्वा पापं नाचर्येत कलाविति । अहमेनां शोणितां ते भगिनीमुद्याने कामयनानः आसम् । विस्रम्भावसरे झटिति समेत्य तौ धूर्तौ चलप्रोथकण्डूलौ मया सह युद्धमारभेताम् ।

कण्डू० - मातः! अतीव कुक्षिम्भरिरेष दुष्टलोकः । अनेन गृध्नुना ज्येष्ठभुजङ्गेन बलात्कृता पूर्वमेव "मनोहरोऽसि कनिष्ठोऽसि" इति मामेव तत्त्वतः कामयमाना इयं ते द्वितीयभगिनी ।
(अपरे त्रयः पुत्राः आधावन्ति, तृतीयभगिनी हस्तिनी च)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीर्घ० - मातः पश्य पश्य । कर्तर्या एष दुष्टः उलूकाक्षः मत्कर्णम् अच्छिनत् । हा! अम्ब! ह्यस्सायमेव अनया हस्तिन्या ते तृतीयभगिन्या "अहो कियान् द्राघीयान् रम्भापत्रसौम्योऽयं ते कर्णपाशः" इति लालित एष मे कर्णः अनेन छिन्नः । (इति रोदितुमारभते)

(ततः सरभसं राजश्यालो दंष्ट्री रक्षिपुरुषश्च प्रविशतः)

दंष्ट्री - रे ब्राह्मण! किमिमे ते पुत्राः? के इमे पृथग्जनप्राये स्त्रियौ? अरे लटकाः! कथं राजवीथ्यां विटतां न भयं युष्माकम्?

ज्येष्ठः - अरे! कस्त्वम्? किं वयमकरवाम?

दंष्ट्री - कथं किमिदं नाम? राजवीथ्यां समालिङ्गतां परिचुम्बतां च न वो लज्जास्ति?

ज्येष्ठः - किमत्र अवद्यं वर्तते? चुम्बनादि केवलस्वागतादिसमुदाचारमात्रमिति नागरिकताम् अजानतस्तवैव सर्वत्र काममेव उत्प्रेक्षमाणस्य कामुकता महती ।

दंष्ट्री - अहो! यदि रथ्यायामेव एतावत्, किमवशिष्यते आभ्यन्तराय? अरे रे शुनकाः! पुरुषक! रज्जुभिः षडपि एतान् बधान । (ब्राह्मणं प्रति) ब्राह्मण! विशिखासु अगणितदिवानिशं भुजङ्गवृत्तं चरत एतान् षडपि कलहायमानान् कारागृहे प्रक्षिप्य उपवासशोषणैर्विनयं प्रापय्य मदन्तिकं सेवकवर्गप्रवेशाय आनयेति आज्ञप्तोऽस्मि स्वामिना । इमे पुनः अत्रैव नदीप्रवाहे प्रक्षेप्तुमादिष्टोऽस्मि ।

(बलात् पुरुषकः पुत्रान् बध्नाति । राजश्यालः हठात् गृहीत्वा यावत्प्राणरोधं वेगेन परिभ्राम्य ते द्वे शोणिताहस्तिन्यौ प्रवाहे प्रक्षिपति । पुत्रा मातरम् अपाङ्गैः संज्ञापयन्ति ।)

पुत्राः - मातः! मातः! त्वमेव उपलाल्य नः, अनुज्ञाय तं तं स्वैराचारम्, अद्य प्राप्ते कष्टे क्रूरं नः प्रक्षिपसि मृत्योर्मुखे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दंष्ट्री - अलमलं विषादेन सर्वपापमूलभूताम् इमां वो मातरमद्य स्वाम्येव स्वयं दण्डयिष्यति यथोचितम् । यूयं पुनरागच्छत ।

त्रिव० - (औद्धत्येन राजश्यालमभिगत्य) अरे! दुष्ट! दंष्ट्रिन्! वराह! कस्त्वम्? को जानाति ते स्वामिनम्? नास्त्येवास्य पत्तनस्य राजेति सर्वसंप्रतिपन्नमेतत्। त्यज मत्पुत्रकान्। अहो प्रियकाः! जातकाः! (इति रोदिति। श्यालस्तां पदा निर्भर्त्सयति। सामोदं हसति ब्राह्मणः। पत्नी त्रिव० सकोपं स्वभर्तारमधिक्षिपति हस्ताभिनयैः।)

दंष्ट्री - धिक्, धिक् अस्मिन् पत्तने इदं कुटुम्बमेकमेव इयते श्रमाय नः। (परिवृत्य ब्राह्मणं प्रति) ब्राह्मण! किं स्मरसि? अवधारय, अद्य रात्र्याश्चरमे यामे स्वाम्याज्ञानुरोधेन ते भवनं पातयिष्यामि। सज्जो भव, परत्र यात्रार्थम्।

ब्रा० - श्वः प्रातरिति खलु पूर्वमुक्तं त्वया?

दंष्ट्री - आम्, अद्य सन्निहिततरो जातस्स कालः। को वेत्ति, अद्यैव सद्यस्त्वया गृहमुज्झ्यतामिति राजा कदाचिदाज्ञापयेत्। (ब्राह्मणः कम्पते)। भवतु, मा भैषीः। गृहात् गृहं प्राणिजातमात्रमत्र धावयित्वा चतुरङ्गं स्वामिना क्रीड्यते। इदं धावनं केचिदुत्सवं मन्यन्ते अत्र मूढाः पौराः। त्वं पुनर्यदि सुमेधा बुभूषसि, भवितुं वा त्वया पार्यते, भविष्यक्षेमाय स्वामिनं प्रार्थयमानो भव।
(इति बद्धैः पुत्रैरपगच्छति। रुदती पुत्रप्रार्थिनी माताप्यपगच्छति। संमिलितः पौरजनः।)

एकः - अहो करुणेयमवस्था (इति अश्रु मुञ्चति।)

द्वितीयः - धिगेतस्य पुंसः क्लैब्यम्। जानाम्येतान् दारकान्। सर्व एव बुद्धिमन्तः। सा परं माता लालनेनैव तान् निहतवती। अयं तु निर्बलः तां भार्यां स्कन्धारूढां प्रश्रितं वहन् सर्वमेव आकुलीचकार। काले उपदिष्टाः, उपाध्यायहस्तसमर्पिता वा पुत्रा नैवैवं विप्रकुर्वीरन्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयः - (ब्रा० उपसृत्य) सखे ! तपस्विन् ! अतिदूये ते दशावैषम्यं पश्यन् । गृहं गच्छ । भार्यां वा पर्यवेक्षस्व ।

ब्रा० - (तं प्रति) अतीव अधमर्णोऽस्मि ते अव्याजकारुण्याय दिव्योपदेशाय च । अहं पुनः इमां दशां सौम्यां मन्यमानः परं हृष्यामि । अद्य रात्र्यास्तुरीये यामे तद्गृहं मे राजाज्ञया नूनं निपतिष्यति । यामद्वयमेवान्तरा वर्तमानं प्रेक्षे । तत् किंचिदत्र एकान्ते कैवल्याय स्पृहयामि । पश्य मे शठां भार्याम् । तथा तथा माम् आश्लिष्य, मया परिलुब्ध्य, अद्य पुत्रानुत्सृज्य गता सा । किमेतया मे स्वैरिण्या । सर्वथा तदभाव एव मे सौख्याय कल्पेत । 'नान्यः पन्था विद्यतेऽयनाय' । पुत्रास्तु दिष्ट्या मता एव । अद्य यामद्वयमपि वा निर्भार्यं निश्चिन्तम् भवेयमिति आशासे ।

चतुर्थः - अहो ! कथं क्रूरे सन्न्यासमार्गे प्रवृत्तोऽसि । अकरुण ! कथमनाथां भार्यां त्यजन् न बिभेषि ?

ब्रा० - (चतुर्थं वीक्ष्य) कथम् अनाथा भविष्यति सा ? सर्वथा नास्ति लोके मूढानां दारिद्र्यम् । तच्च जरत्कुट्टनी माता मायावती सम्यग् जानाति । (साञ्जलि) हंहो ! अलं युष्माकं निर्व्याजया करुणया । गृहाणि गत्वा स्वकुटुम्बं सम्यक् पर्यवेक्षध्वम् । कथं, कथंचन त्यक्तभार्यस्य मे एतन्नूतनं कष्टम् आपतितं भवद्भ्यः । भोः ! अपि किंचिन्मां मुञ्चत ? अहं करोमि, अहं भोक्ष्ये । कुतो युष्माकम् इयती विचारणा । सुगतं, सुगतमस्तु वः ।

षष्ठः - भोः सुहृदः किमस्माकं, कः कथं यातीति का वा अस्माकं चिन्ता ?

'अहन्यहन्यात्मन एव तावत् ज्ञातुं प्रमादस्खलितं न शक्यम् ।
प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः ।।'

आगच्छत । कलौ यदि उपदेशं कुरुथ, तदा मनुष्यः कुप्यति । अत्येति कालः । एतावद्विलम्ब्य गृहं गच्छतामस्माकं, को जानाति, आहारस्थाने प्रहार एव प्रतिपालयन् भविष्यति ।

(निष्क्रान्ताः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रा० - (ध्यात्वा ! संशयित इव पश्चात्तप्त इव) कथं सर्वैरेव उज्झितोऽस्मि । न पुत्राः, न भार्या, न सुहृदः । (पुनः सचिन्तमात्मानं प्रत्यवस्थापयन्) अथवा यात्रायाश्चरमोऽयं भागः एकान्तमेव चरणीयः । किमद्य करवाणि ? तत् तत् उक्त्वा, चित्तं प्रक्षोभ्य, विचिकित्सासन्देहतरङ्गतुमुलं कृत्वा गतास्सुहृदः । अहो कथं वक्तुं नैव कारुण्यदारिद्र्यं जनानाम् ? आविश्य स्तिमितमनुबध्य तत्तत्सदयं पृच्छति, ततश्च तूष्णीं यथागतं गच्छति । न केवलं यात्रायाश्चरमो भागः, परन्तु सर्वैव यात्रा स्वबलेनैव, एकान्तमेव, असहायमेव कर्तव्या । सत्यमुक्तम् 'आत्मना आत्मान-मुद्धरेत्' इति ।

(ततः प्रविशति पञ्चकच्छी कुण्डली कश्चित्)

कुण्डली - (उपसृत्य) वत्स ! अहं ते करणीयं बोधयामि ।

ब्रा० - अहो ! सुदिष्टं मे । कस्त्वं दयालुः ?

कुण्डली - वत्स ! मामनुसर ।

ब्रा० - कुत्र ?

कुण्ड० - किं ते विचारितेन । अनुसर माम् ।

ब्रा० - भवतु, प्रथमतः यात्रोद्देशं कथयतु भवान् । कस्त्वम् ?

कुण्ड० - अस्ति ममैव विदितं किमप्यत्र दिव्यम् अयनम् । यदि मदुक्तमनुतिष्ठसि, श्वः प्रातः विमुक्तेऽस्मिन् गृहे, अत्रैव त्वदर्थं प्रतिपालयता मया साकं मनोहरं सुधामयं सौरभमयं सुन्दरीमयं पत्तनं त्वं व्रजिष्यसि ।

ब्रा० - महाब्राह्मण ! परमपूजार्ह इव दृश्यसे । मम पुनः कुत्रापि न गन्तव्यम् । पत्तनात् पत्तनं कथं विशिष्यते ? 'अदृष्टमपि दृष्टवत्' । नाहं त्वया समागच्छामि । अत्रैव सुन्दरीसौरभादि बहु बहु दृष्टवानस्मि । क्षमन्तां भवन्तो महान्तः, अस्य मे भवदाज्ञाविघातम् । साधयन्तु भवन्तः । कार्याकुलानिव वः प्रेक्षे ।

(निष्क्रान्तः कुण्डली । पुनश्चिन्तयन्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हन्त! अतिक्रान्तः पूर्णतया प्रथमो यामः । 'तम आस्ते तमसा गूढमग्रे' । दुर्गः पन्थाः । नैव रेखामपि गन्तुं पुरः पश्यामि । (सचिन्तम्) किं गृहमेव पुनर्गत्वा तथैव भार्यया कुटुम्बे निमज्जामि । स्यादेतत् - सर्वा एव भार्या एवमेव, न पुनर्ममेति किंचिद्विशिष्टं कष्टं वर्तते । समाने दुःखे कः स्वानुतापः? (सवितर्कम्) आहोस्वित्, एनमद्यैव गतं कुण्डलिनमनुधावामि? (निश्चित्य) भवतु, प्रवाहेऽत्र पतित्वा आत्मानं घातयिष्यामि ।

(इति धावति । सद्य एतावत्कालं मठकोणे उपविश्य जपासक्तः कोऽपि वृद्धः, वृत्तं सर्वं सहासं साक्षीकृत्य, उत्थाय सहसा ब्राह्मणमुपगृह्य वारयति । संभ्रान्ता मठान्तः एतावत्कालं निगूढा चन्द्रिकाप्यागत्य तं करान्तरे आकुलं गृह्णाति ।

वृद्धः - अयि रभस! किमिदं व्यवस्यते? घातयसि चेदात्मानम्, कस्य नाशोऽयम्? कं वञ्चितवानस्मीति चिन्तयसि?

अद्य दिष्ट्या पुत्रैः दुष्टैः, दुष्टया भार्यया च परिमुक्तोऽसि । 'जीवन्नरो भद्रशतानि पश्यति', 'शरीरमाद्यं खलु धर्मसाधनम्' । सर्वत्र सर्वथा निर्वेदेन न किमपि प्रयोजनमस्ति ।

'अनिर्वेदः श्रियो मूलम् अनिर्वेदः परं सुखम् ।'

ब्रा० - (साञ्जलि) स्वामिनः, करुणाकुलाः! सदयैरपि भवद्भिः व्यर्थं रक्षितोऽयं मांसपिण्डो मे । एतावत्कालं चण्डेन कुटुम्बकदनेन नितान्तं खादितावसादितमेतन्मे वपुः । श्वः प्रातः गृहं मे मुक्त्वा अन्यद्गृहं गन्तव्यम् । कियत्कालम् अत्रेमां गृहप्रवेशपरम्पराव्यथाम् अनुभवतु एष तपस्वी । सर्वथा नास्ति मे मोक्षः । अपि च मन्ये, भार्या मां सत्यमनुसरिष्यत्येव । सर्वथा नास्ति मे तस्याः पिशाचिकाया मोक्षः । अतः पत्तन एव अस्मिन् न भवितव्यमिति मे मतिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धः - (उपहस्य) इदं पत्तनं मुक्त्वा कतरत्पत्तनान्तरं जिगमिषसि? एकं पत्तनं पत्तनान्तरात् नैव विशिष्यते इति त्वयैवाद्य कुण्डली प्रत्युक्तः। अत्र शर्म समश्नुतां भवान्।

ब्रा० - 'अत्रैव' 'शर्म' चेति अत्यन्तदुर्घटमेतन्मे प्रतिभाति।

वृद्धः - सत्यं प्रतिभात्येव, नतु तत्त्वतो दुर्घटं तत्। नेह सौख्यस्य वासोऽस्ति न ग्रामान्तरमेव च।

ब्रा० - सूक्ष्ममेतत् वाक्च्छलं नाधिगच्छामि। मोहयन्ति भवन्तो माम्।

वृद्धः - वत्स, शृणु। अत्रैव पत्तने तव अज्ञातं सञ्चरन्ती ते श्वश्रूः मायावती त्वामेवं बलात् मोहयति, न त्वहम्। तस्यां कथंचन व्यापादितायां सर्वम् अश्रद्धितमपि स्थूलं ते साक्षात्कृतं भवेत्। अत्र पश्य, मीलय ते अक्षिणी। यत्र कुत्र वा सा ते श्वश्रूः भवतु, इमं मन्त्रमुच्चारय, सा सद्यो मरिष्यति।

(इति कर्णे कथयति)

(भार्या त्रिवर्णिनी जवादाधाव्य उभयोरपि पादयोः निपत्य)

पत्नी त्रिव० - स्वामिन्, अज्ञानात् प्रबलेन मदीयद्वितीयतृतीयभगिनीदुरुपदेशेन चिराय भर्तरि अत्यन्तं कृतापराधास्मि। अल्पायुषः पुत्राः दिष्ट्या स्वामिना नृपेण अनुकम्प्य संशोधिताः नृपसेवानिवेशेष्वेव प्रवेक्ष्यन्तीति कल्याणीं वार्तां शृणोमि। स्वगुणानुरूपं स्वामिना महाराजेन मद्भगिनिके ते द्वे अपि दण्डिते। अद्य मे प्रथमा भगिनी क्व गतेति चिन्तया तप्येऽहं बलवत्। तां प्रति, भर्तारं प्रति च बहु बहु अपराद्धास्मि। भर्तुर्मे गुणातिशयस्य सैव महासत्त्वा स्वच्छशीला भार्या भवितुमर्हति। केवलमीर्ष्यया तां पीडयन्ती आसम् (परिवृत्य पश्यन्ती) अहो, भगिनि, विस्मर मे दुश्चेष्टितानि। एहि, आलिङ्ग माम्।

(उभौ गाढम् आलिङ्गतः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धः - (त्रिवर्णिनीं प्रति) अयि चिरात् खलु प्रसादो गृहीतो भवत्या । अद्यैव सती भवसि । पूर्णं पातिव्रत्यं चाद्य त्वयि शोभते । 'प्रतिकूलेनापि पतिं सेवन्ते भर्तृवत्सलाः साध्व्यः' । अतः अद्य मे वचनं कुरु-स्वामिनो राज्ञः अवरोधे तव भर्तुरेवानुकूल्याय, राज्ञस्तव भर्तरि प्रसादापादनार्थं, सेवां स्वीकुरुष्व ।

त्रिव० - अद्य यद्वा तद्वा विधास्यामि भर्तुः कल्याणाय । सर्वथा राज्ञो दासी भविष्यामि ।

वृद्धः - तवापि तत्र परा साध्वी कीर्तिः श्रीश्च भविष्यति ।

त्रिव० - नहि नहि, नैव कीर्तिं श्रियं वा कामये तिलशोऽपि । एवं कृते भर्तुरुपकृतं स्यादित्येव अव्याजं प्रविशामि राजसेवाप्रवृत्तिम् ।

(क्षणात् वृद्धो वेषमपनीय तिष्ठति)

वृद्धः (स्वामी, राजा) - अहमस्मि वः स्वामी ।

सर्वे - अहो नः स्वामी महाराजः !

(इति नमस्कुर्वन्ति)

स्वामी, राजा - उत्तिष्ठत । (त्रिव० प्रति) अयि अतीव अद्य सौम्यासि । परीक्षास्थिरं ते हृदयम् । (ब्राह्मणं प्रति) ब्राह्मण, अद्य तव अनया ते भार्यया अनुमतां आदृतामिमां तद्भगिनीं चन्द्रिकां च विवाहयिष्यामि ।

त्रिव० - प्रियं मे, प्रियं मे ।

ब्रा० - (सानन्दस्मितम्) अनुगृहीतोऽस्मि ।

(चन्द्रिका सलज्जोदारं भगिनीं पश्यति । उभे भगिन्यौ गाढमालिङ्गतः ।)

राजा - भो, ब्राह्मण, अद्य गम्यतां प्रातः नूतनं गेहम् । निर्विश्यताम् आनन्दभूमा । इयं पुनः चन्द्रिकेव सौम्यप्रकृतिमापन्ना त्वयैव सह वसतु । अद्य अस्याः प्रसादावसरे, तव नूतनविवाहावसरे च, अस्याः नवीनं नामकरणं चिकीर्षामि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रिव० - प्रियं मे ।

राजा - अयि! प्रसादकारणात् त्वां "प्रसन्ना" इत्येव आह्वातुम् उचितम् । ब्राह्मण, इतः सव्यपार्श्वेऽसौ चन्द्रिका । आर्ये प्रसन्ने, त्वमेतत्पार्श्वे विराजसे । किं वो भूयः प्रियमुपहरामि ?

ब्रा० - राजन्! किमन्यदाशास्यमस्ति त्वय्यस्मासु करुणां कुर्वति ? तथापि इदमस्तु भरतवाक्यम् -

ईशस्त्वं, पुरुषोऽस्मि, गेहमिह मे देहं, स दंष्ट्री यमः,
सा भार्या प्रकृतिः, गुणा भगिनिकाः, माया च तासां प्रसूः ।
षट् पुत्रा मन इन्द्रियाणि, नगरं लोकः, विमुक्त्यै ततः
सत्त्वस्था प्रकृतिः, तथा प्रहसनं दृष्ट्वा जना जानताम् ॥*

पात्राणि—

ब्राह्मण आत्मनाथाख्यः (जीवात्मा) ।

तस्य षट्पुत्राः - लटकेश्वरः ज्येष्ठः (मनः);

चलप्रोथः, शुण्डालः, दीर्घश्रवाः,

उलूकाक्षः, कण्डूलः (कनिष्ठः) (पञ्च इन्द्रियाणि) ।

ब्राह्मणस्य भार्या-त्रिवर्णिनी, अन्ते प्रसन्नाभिधा (प्रकृतिः) ।

तस्याः माता मायावती (माया), परोक्षैव ।

तस्याः तिस्रो भगिन्यः चन्द्रिका, शोणिता, हस्तिनी च (त्रयो गुणाः सत्त्वं, रजः, तमः) ।

वृद्धः, स एव स्वामी, राजा, पत्तनेश्वरः (ईश्वरः) ।

दंष्ट्री, राजश्यालः, सर्वाधिकारी (धर्मः, यमः) ।

पुरुषकः, श्यालस्य भटः ।

पौराः (तत्तच्छास्त्रमार्गानुसारिणः) ।

---

* इदं रूपकं संस्कृतरङ्गेण तुरीयवार्षिकोत्सवे रङ्गे प्रयुक्तम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री:

॥ टीका ॥

आपाततः प्रहसनमध्यात्मगहनाशयम् ।
बिवृणोति विमुक्तयाख्यां राघवो निजनिर्मितिम् ॥

॥ प्रस्तावना ॥

तुच्छालाभेति- अलाभः विनाशश्च ताभ्याम् । **हासो दयापीति-** प्रहसनप्रायमिदं चेष्टितमिति हासः, हन्त क्रियते दुःखायेदं सर्वमविवेकविजृम्भितमिति तदेव चेष्टितं दृष्ट्वा दया चेति लोकातिगस्य प्रेक्षावतो दृष्टिभेदाद् द्विधा वृत्तिभेदः ॥

गाध एष लोकः । उपरिप्लवः असार इत्यर्थः ।

कृतात्मानो विहितमतयोऽस्य सामाजिकाः । एवं च आपातदृष्ट्यात्र रसो हास्यः, आध्यात्मिकदृष्ट्या तु शान्तः । लिप्सते, मिथः पीडयति, कुप्यति इत्यादिना पूर्वपक्षभूतानि शान्तेतराणि शृङ्गारादीनि रसान्तराणि निर्दिष्टानि । यदाह अभिनवगुप्तः 'तत्त्वज्ञानलक्षणस्य च स्थायिनः समस्तोऽयं लौकिकालौकिकचित्तवृत्तिकलापो व्यभिचारितामभ्येति । 'तत्त्वज्ञानं तु * * सर्वा रत्यादिकाः चित्तवृत्तीर्व्यभिचारीभावयन् * *' इति अभिनवभारत्याम् ॥

एतत्तस्य मुखादिति । पाथःकणे मुक्तामणिबुद्धिः यथा शुक्तिकायां रजतबुद्धिः । जड इति - द्रष्टुरविवेकाक्रान्तत्वमुक्तम् । **अङ्गुल्यग्रेति** - भ्रमस्य अर्थक्रियाकारित्वेन मौक्तिकबुद्ध्या पाथःकणादानप्रयत्नः, तद्वैफल्याच्छोकश्चेति अविद्यावद्विषयाः सर्वे मानुषप्रयत्ना इति दर्शितं महाकविना ॥

॥ प्रथमोऽङ्कः ॥

आत्मनाथ इति द्रमिडब्राह्मणेषु प्रसिद्धेष्वभिधानेष्वन्यतमम् । अनेन तत्त्वतः स्वयं नाथ ऐश्वर्यलक्षितः आत्मा शारीरकश्चाभिप्रेतः ॥

उलूकाक्ष इत्यनेन पुत्रनाम्ना दुर्विषयाभिनिविष्टं चक्षुरिन्द्रियं लक्ष्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'पटोलपुष्पं ते नयनं भवतु' इति। द्रमिडभाषायां प्रसिद्धः चक्षुरिन्द्रियविषयकः अभिशापाभाणकः । पटलदोषेण नष्टकालिम्नः श्वेतमानतारकस्य चक्षुषः पटोलपुष्पसादृश्यं तद्दृष्टवतामनुभवगोचरः ॥

चलप्रोथ इति सातत्येन स्वानियतव्यसनव्यापृतो रसनेन्द्रिय उक्तः। गोणी वस्तुसंग्राहिका शणतन्तुनिर्मिता ॥

शुण्डाल इति। एतन्नामके पुत्रे घ्राणेन्द्रियस्य समाधिः ॥

दीर्घश्रवा नाम पुत्रः, श्रोत्रेन्द्रियप्रतिनिधिः।

कण्डूल इति अविरतां वर्धमानां च लालसतां बिभ्रत् त्वगिन्द्रियं लक्षितम्।

रथवीथीति । ग्रामेषु देवालयमभितो रथयात्रार्थं क्लृप्ता दिक्चतुष्टयेऽपि चतस्रो विशाला वीथ्यः, यासु दक्षिणस्यां वीथ्यां देवालयसंबन्धिनो गायका वादका गणिकाश्च वसन्ति । नागस्वर इति सुषिरवाद्यविशेषः । बहुश्रुतिरिति तद्वादकस्य पारिहासिकं नाम । सर्वमपि गानं वादनं च एकामेव स्थिरां श्रुतिं तत्स्थानविशेषं चाधारीकृत्य क्रियते । बहुश्रुतिस्तु स दुष्टो गायको वादको वा यः स्वीकृते श्रुतिस्थाने न स्थातुं शक्नोति । स्वरसंख्यामिति । संगीते सप्तैव स्वराः, तत् को वा विवादस्तत्संख्यायामिति तयोर्वादकरसिकयोः परिहासः ॥

ब्रह्मपत्रमिति तमाखोः द्रमिडदेशे प्रसिद्धं पारिहासिकं नाम । एतस्मिन् गायकानां गानरसिकानां च महानभिरुचिः । 'कृमिगृहं भवेद् वदनम्' इति द्रमिडप्रसिद्धा असमीचीनभाषिणं प्रति निन्दोक्तिः । 'मुणुमुणायस' इति उपांशुभाषणार्थे अनुकरणशब्दः । एवमेव उपरि 'मडमडायिष्यामि' इति ताडनभेदनार्थेषु अनुकरणशब्दः ॥

विपणिभक्ष्यमिति आपणे पक्वं भक्ष्यं, यद्ग्रहणभक्षणादि आचारवतां निषिद्धम्।

त्रिवर्णिनीति भार्याया नाम। दुष्कुलेति पूर्वं निर्देशात् वर्णत्रयान्वयकथनाच्च तस्या अशुद्धवंशत्वरूपा निन्दा सूचिता । अन्यत्र इयमात्मनाथभार्या आत्मनः सहयोगिन्या तत्तत्कुर्वाणाया मूलप्रकृतेः प्रतिरूपिका इति कृत्वा नामौचित्यमनुसन्धेयम् । सत्त्वरजस्तमोरूपगुणत्रयात्मिका सा, तेषां च गुणानां क्रमेण धवल-रक्त-काल-वर्णाश्च विदिता एव ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कौलीनमपवादः । यद्यपि कुलीनस्य भावः कौलीनं, तथापि अर्थे भेदः ॥

कर्मवशादिति लोकोक्त्या शास्त्रोक्त्या च । **कुतस्त्वमागता** इत्यनेन शास्त्रनयेन तस्या मूलप्रकृतिभूतायाः अनादित्वमुक्तं भवति ॥

मातुर्मायावत्या इति । शास्त्रे या माया प्रसिद्धा सर्वानर्थमूला सैवेयम् ॥

मातृदेव्या पराशक्त्येति । पत्नीविषये सोल्लुण्ठस्य वाक्यस्यास्य सर्वकार्यहेतुभूतायां प्रकृत्यां शास्त्रतस्समीचीनोऽन्वयो भवति ॥

लेटकेश्वरः ज्येष्ठपुत्रः, तस्मिन् अन्तरिन्द्रियस्य मनस्तत्त्वस्य समाधिः । धूर्तानां पञ्चेन्द्रियप्रतिनिधिभूतानां पुत्राणां नेतृत्वेन तस्य लेटकेश्वर इति नाम्न औचित्यम् ।

कुम्भीपाको नरकविशेषः । 'ज्येष्ठस्यैवोपरि अन्यादृशं लालनं समर्प्यत' इति । मनोद्वारैव सर्वेन्द्रियाणां प्रवृत्तिर्नियमनं च भवतीत्यत एवमुक्तम् । 'सर्वथा न मदीया इमे' इति लोकोक्त्या कस्यापि पुत्रचरितकुपितस्य पितुः पुत्रान् प्रति निर्वेदोक्तिः । शास्त्रदृष्ट्या च निष्क्रियस्य पुरुषस्य प्रकृतिपरिणामभूतानां च मनआदीनां विकाराणां न कश्चन तात्त्विकः संबन्धोऽस्ति । 'न ममैते' इत्येव विवेकज्ञानस्यापि प्रकारो भवति ॥

कियत्कालादारभ्येति शास्त्रदृष्ट्या प्रकृतिपुरुषयोगस्य अनादित्वमालम्ब्योक्तम् । 'आत्मा वै पत्नीनाम्न्यसि' इति 'आत्मा वै पुत्रनामासि' इति श्रुतेर्विडम्बना । प्रकृतिकार्यस्य पुरुषेऽध्यासात्, पुरुषस्य कर्तृत्वभ्रमात्तादात्म्यमिदं संभवत्येव । **जरती**, अनादिकालप्रवृत्तत्वात् । **मोहचूर्णेन** वशीकरणप्रयोगविशेषेण ; शास्त्रदृष्ट्या साक्षान्मोहेन । 'को वा पुरजिह्वां बन्धुं प्रभवति' इति द्रमिडाभाणकानुवादः । जनेषु प्रवादं को वा शमयितुमीष्ट इत्यर्थः । 'हृदयं त्वेव जानाति' इत्यादिकं सीतारामप्रेमविषयकं वाक्यं वाल्मीकिरामायणे बालकाण्डे अन्तिमसर्गे अन्ते (७७.३०) दृश्यमानम् ॥

'यद् भवानिह भुवनं भुनक्ति * * भोगशक्तितर्वा, सर्वं तन्मदनुग्रहः' । इदं सर्वं लोकोक्त्या धृष्टवादिन्यां पत्न्यामुपपद्यमानं शास्त्रदृष्ट्या केवले निर्गुणे निष्क्रिये प्रकृतिकृतभोगोपलक्षिते पुरुषे सम्यग् घटत एव । एवमेव उपरितनान्यपि द्वित्राणि वाक्यानि ॥

विवाहतन्तुविच्छेदः 'डिवोर्स' इति अद्यत्वे ख्यातः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'लोके त्वमेव कर्ता' इत्यादिकं पूर्वोक्तनयेन लोकशास्त्रोभयदृष्टिभ्यामपि संघटते।

'त्वां स्वयमहं त्यक्ष्यामि' इति। व्यक्ताव्यक्तज्ञविज्ञानोदये सा दृष्टास्मीति प्रकृतिः स्वीयात् परिणामव्यापारात् स्वयं निवर्तते इत्युक्तत्वात् ॥

'भर्ता खलु परं नार्याः' इत्यादिकं रामायणात्। (सुन्दर-१६. २६)

'यदि शक्तिः प्रभवतु भवान्'। केवलस्य पुरुषस्य प्रकृत्यसहकृतस्य प्रभवनानुपपत्तेः ॥

'किमुदरे वृकं निबद्धवानसि' इति तीव्रबुभुक्षार्था लोकोक्तिः।

'युष्मान् पुनः पुनर्हतानपि' इत्यादिना इन्द्रियनिग्रहेण अशनायादिषु निगृहीतेष्वपि 'प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति' (३. ३३), 'काम एष' 'महाशनो महापाप्मा' (३. ३७), इति भगवद्गीतोक्तप्रकारेण पुनः पुनरिन्द्रियाभिषङ्गानामुद्बुद्धिरेवं वर्णिता।

'नित्यैकादशीदीक्षः' नित्योपवासव्रती। 'मा उदरे ताडयत' इति द्रमिडाभाणकानुवादः। 'उदरे ताडनं नाम अन्नस्य अप्रदानम्। सर्वोऽयमेकं रसनेन्द्रियप्रतिनिधिं चलप्रोथं नाम पुत्रं, बुभुक्षां चादाय प्रपञ्चः इन्द्रियान्तराणां तथा व्यसनान्तराणां चोपलक्षणम्। आहारो हि सर्वेन्द्रियसन्तर्पणमात्रस्य समीचीनः प्रतीको भवति। सीमन्तकुमारो ज्येष्ठपुत्रः ॥

'अन्यां कठोरं दृष्ट्वा' 'अनालिङ्गिता स्त्री' इत्यादिना प्रथमसोदरी सत्त्वगुणप्रतिनिधिभूता अभिप्रेता, यत्र रजस्तमःप्राबल्याद्रुचिर्न भवति ॥

वयं त्वमसि। तत्त्वमसीति महावाक्यविडम्बनमिदं प्रकृति-तद्गुणानामैक्यं कथयति। गुणा एव हि प्रकृतिः। स्वभावक्लीबमिति। लोकदृष्ट्या भर्तुः निन्दात्मकमिदं शास्त्रदृष्ट्या पुरुषस्य अकर्तृकत्वेन उपपद्यतेतमाम्। 'वस्तुमात्रं त्वत्कल्पितम्' इतीदं प्रकृतिपरिणामेन सर्वं व्याप्तम् इति हेतोर्युज्यते ॥

'असदपि सत्तया' इत्यनेन भ्रान्तिज्ञानमुच्यते। आथर्वणिक्यः मायेन्द्रजालादिविद्याकुशलाः ॥

'अणुरूपोऽपि महाव्यापकः' इत्यनेन मनसः स्वरूपमुक्तं वेदितव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'शठे मान्द्ययोग्ये उपनिषत्सु' इति कठच्छान्दोग्यनामविडम्बना। एवं 'भार्यावास्य'मिति ईशावास्यविडम्बना। 'यच्च किञ्चिदिति' महानारायणोपनिषद्गतो मन्त्रः (११.६); तस्यान्तिमपदयोर्व्यत्यासेनात्र विडम्बनार्थः पाठः॥

'इदं गृहमस्मदीयमेव' इतीदमुपपद्यते, यतः प्रकृतिविकारात्मकमिदं गृहरूपकेण निर्दिष्टं करणकलेबरादिकम्। 'त्वमेवात्र चोर' इत्यनेन पुरुषस्य प्रकृतिकार्येण शरीरेण यत्संबन्धः तस्य अवास्तविकत्वमुक्तं वेदितव्यम्॥

'मूकं स्थिता प्रथमभगिनी मन्दं मन्दं परिवृत्य ब्राह्मणमालोकयन्ती' इत्यनेन तस्याः प्रतिनिधिभूते सत्त्वगुणे पुरुषस्य मन्दं मन्दमभिनिवेशः भवति इतीदं सूचितम्॥

'मौढ्यान् मौढ्यात्संभवसि' इत्यत्रत्यं वाक्यद्वयं 'अङ्गादङ्गात् संभवसि', 'आत्मा वै पुत्रनामासि' इति श्रौतवाक्यद्वयस्य विडम्बनात्मकम्। 'स्त्रिया पूर्यते' (बृह.१. ४.३), 'सोऽकामयत' (तैत्ति.२.६.) 'तदेकाकी न रमते' (बृह. १.४.५) इति औपनिषदं वाक्यत्रयं ज्येष्ठपुत्रेण कामुकेन लौकिकश्रृङ्गारार्थकतया उदाहियते। एवमेव 'आत्मतुष्टिस्तथैव च' इति स्मृतिवाक्यमपि स्वेच्छार्थकतया तेनैव उदाह्रियते॥

कौक्कुटिकाः कूटवृत्तयो दाम्भिकाः।

'काश्यपा यूयम्' इति। यथा रामायणे अयोध्याकाण्डे कौसल्या- 'शुश्रूषुर्जननीं पुत्रः स्वगृहे नियतो वसन्। परेण तपसा युक्तः काश्यपस्त्रिदिवं गतः॥' (२१. २४) इति॥

इमाः स्त्रियः त्वद्भार्याया अपृथक्सिद्धाः। प्रकृतेर्गुणत्रयात्मकत्वात् भार्यायाः तद्भगिनीनां चापृथक्सिद्धत्वमुक्तम्। 'प्रथममेव तस्याः सुताश्चतस्रोऽपि परिणीतवान्' इति। यदा प्रकृतिपुरुषयोः योगो भवति, तदाऽनिवार्यतया गुणत्रयाणामपि योगो भवतीति कृत्वा एवमुक्तम्॥

'पुरुषोऽपि त्वमपौरुष' इति पुरुषस्य केवलताम्, अकर्तृतां चालम्ब्योक्तम्।

मीनराज्यं मात्स्यन्यायः, यत्र प्रबलो दुर्बलं भक्षयति।

'को वा हस्तिनं गृहे निबध्य भोजयितुं प्रभवेत्' इति द्रमिडाभाणकानुवादः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मार्गशीर्षहरिभजनगोष्ठी । मार्गशिरोमासे प्रत्युषसि भक्ता भागवताश्च मिलित्वा नामसंकीर्तनानि गायन्तः देवालयस्य तीर्थविशेषस्य वाभितः परिक्रमणं कुर्वन्ति । तत्र गोष्ठीपरिभ्रमणान्ते भगवते निवेदितं भक्ष्यं गोष्ठीभाग्भ्यो विभज्य प्रदीयते । अयमेव भगवन्निवेद्यांशः प्रातराशः कल्यवर्तायापि तत् कल्पत इत्यनेन उक्तः ॥

भगवत्सङ्कीर्तनस्य भक्तेरङ्गत्वेन तत्र प्रवृत्तिः पित्रा पुत्रायानुशिष्टा । गीतविद्यायाश्च इदमेव परमं प्रयोजनं यन्नादविद्यया भगवदाराधनमिति ।

भक्षणापणिको बुभूषामि इत्यादिना तत्तदिन्द्रियप्रतिनिधिभूतेन पुत्रेण स्वस्वव्यसनाभिषङ्गानुकूला वृत्तिः प्रपञ्च्यते ।

'ज्येष्ठः-एकैकं भणत, नाहमेकपद एव सर्वानपि वः श्रोतुं पारयामि ।' अत्र ज्येष्ठपुत्रो नाम मनः ; मनसश्च शास्त्रदत्तं लक्षणं 'युगपद् ज्ञानानुत्पत्तिः मनसो लिङ्गम्' इति न्यायसूत्रं (१.१.१६) अवधेयम् ॥

'शुक्तीः करिष्यामि किमङ्ग रूप्याणि' 'गन्धर्वपुरीः' इतीदं शुक्तिरजत-गन्धर्वनगर-दृष्टान्तेन प्रपञ्चस्य मिथ्यात्वमालम्ब्योक्तम् ॥

'पश्य नो गृहम्' इत्यत्र गृहं शरीरम् । 'एकान्तरन्ध्र'मिति । 'नवद्वारे पुरे देही' इत्यादिकमत्र स्मर्तव्यम् ।

'शिवः शक्त्या युक्तः' इत्यादिः सौन्दर्यलहर्याः प्रथमः श्लोकः ।

पूर्वाणि नो गृहाणि पूर्वजन्मस्वीकृतानि शरीरान्तराणि ।

मरीचिकानगर्यामिति प्रपञ्चमिथ्यात्वे मृगतृष्णिकादृष्टान्तः ।

असंख्यानि गृहाणि अध्युषितानि । एतेन प्रत्यगात्मनः पूर्वानुभूतानि संख्यातिगानि जन्मानि उक्तानि ॥

जलदोषः वातदोषो वा । वर्षः, प्रबलो वायुर्वा दुर्बलं गृहं शिथिलीकरिष्यति । पक्षान्तरे जलवातदोषाः रोगाः शरीरपातकारणभूताः ।

शाश्वतमिदं धामेति । अतात्त्विकदृष्ट्या शरीरं स्थास्नु इति ।

भुक्तिं वः साधयिष्यामि इत्यनेन प्रकृतिसंपादितः स स पुरुषभोगार्थकोऽनुभवः कथ्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ द्वितीयोऽङ्कः ॥

सायंकालः इति द्वितीयाङ्कस्य कालः । प्रथमाङ्कस्य तु प्रातः कालः । एवं च आत्मकथाया आरम्भः अवसानं च सूच्येते ।

अहो शान्तोदारसौम्यता तस्याः । अत्राभिप्रेता नायकस्य आत्मनाथस्य औत्सुक्यविषयभूता स्त्री सत्त्वगुणप्रतिनिधिः प्रथमभगिनी चन्द्रिकानाम्नी । 'मन्दं मन्दं' इत्यनेन श्लोकेन सत्त्वगुणस्य आविर्भावप्रकारः वेगाभावः, शान्तिः, औदार्यं, शुद्धिः इत्यादयः सूचिताः ॥

अन्ये द्वे, रजः, तमश्च, तत्प्रतिनिधिभूते भगिन्यौ शोणिताहस्तिनीनाम्न्यौ ।

क्षामामपि इति सत्त्वगुणस्य वर्णनं व्रतोपवासादीनां तदङ्गत्वात् । प्रथमं सत्त्वे दुर्लभोऽभिनिवेशः, रजस्तमसोरेव सुलभ इत्यतः प्रकृतिरूपभार्यायाः शोणिताहस्तिन्योर्भगिन्योर्विषये प्रेमातिशयः, चन्द्रिकायामौदासीन्यं च वर्णितम् ॥

काली घना चेति 'गुरुवरणकमेव तम' इति उक्तरीत्या तमःप्रतिरूपाया भगिन्या वर्णनम् । निद्रापि तमःप्रभावादेव ।

'मद्भार्याज्ञानं विना रहसि मां हठात् वशीकर्तुमुत्सहते' इत्यारभ्य 'कार्यं विनैवाभिचरत्यजस्रम्' इति श्लोकान्तपर्यन्तं रजोगुणस्य चेष्टा शोणिताभिधाया भगिन्याश्चेष्टाद्वारा वर्णिता । 'चलं हि रजः' (सांख्यकारिका), 'रजो रागात्मकं विद्धि' (भ. गी. १४-७) इत्यादिशास्त्रे रजःस्वरूपवर्णनं स्मर्तव्यम् । अभिचरति इत्येतेन शब्देन इतस्ततश्चरति, वशीकरणार्थं अभिचारात्मकं मन्त्रादिप्रयोगं करोतीत्यर्थद्वयं प्राप्तम् ॥

'एतयोः मद्भार्यायाः * * साहाय्याय वर्तन्त एव अस्मत्प्रियपुत्रशेखराः ।' पुत्राणां रजस्तमोबहुलत्वादेवमुक्तम् ॥

हंसकशब्दः, नूपुरशब्दः, विवेकज्ञानशीलस्य हंसाभिधस्य च शब्दः ।

शुद्धतीर्थाहरणायेत्यत्र तीर्थशब्दे श्लेषः । नदीतः शुद्धोदकाहरणं स्त्रीभिः सामान्यतः क्रियत एवेति लोकवृत्तानुवादः । पक्षान्तरे तीर्थाः पूज्याः साधवः गुरुभूताः ॥

'गृहं विहाय अत्र मनोहरे नदीतीरे प्रत्यहं त्वां प्रतिपालयन्नस्मि ।' अनेन 'विविक्तदेशसेवित्वम्' (भ. गी. १३-१०) इत्युक्तप्रकारेण सत्त्वोपचयज्ञानसंपत्तिसामग्री उक्ता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मठं प्रविश्य । नदीतीरे च मठस्थितिः प्रसिद्धा । प्रसिद्धं च मठस्य तत्रत्यसाधूनां च संसर्गस्य साधनाङ्गत्वम् ॥

उपनिषद्भूय चरन्ती इत्यस्य गूढं चरन्तीत्यापाततोऽर्थः । पक्षान्तरे च उपनिषद् साक्षाद्वेदान्तः । रहोजापः कर्णेजपरूपः, उपांशुमन्त्रादिजपयज्ञश्च । योगशब्दश्चैवं द्व्यर्थकः, मौनशब्दश्च लौकिकपारमार्थिकविषयद्व्यार्थकः ॥

'पूरयोध्या इति' । 'देवानां पूरयोध्या' इति तैत्तिरीयारण्यके आरुणकाठके १-१७-३ वाक्यं स्मर्तव्यम् । दुष्टभार्यापुत्रादिभ्यो विरक्ताः पुरुषाः प्रायो वदन्ति काशीं गमिष्यामीति । अयोध्या तन्नामकं क्षेत्रमुपलक्षणेन तादृशमन्यद्वा काश्यादि।

शून्यमन्त्रेण । शून्यशब्दः आभिचारिके कर्मणि द्रमिडव्यवहारे प्रयुज्यते ॥

नीलो द्रंष्ट्री पुरुषः-दण्डधरः कर्मसाक्षी यमः ।

अस्मात्स्वामी-भगवान् । इतः परम् ईश्वरस्य अस्तित्व-नास्तित्वयोः पाक्षिकानामभिप्रायाः प्रदर्श्यन्ते ।

'लिकुचेन गाढं घर्षयिष्यामि ते शिरः ।' पित्ताधिक्याच्चित्तभ्रान्तौ शिरसि लिकुचरसेन घर्षणं क्रियते । अत्रापि द्रमिडलोकोक्तिरुपयुक्ता ।

विज्ञाः पौरजनाः-एते विविधाः दार्शनिकाः ।

यथोक्तकाले बलात्कारेण गृहेभ्यः समाच्छिद्य बहिः प्राक्षिपत् इत्यारभ्य अनुमिनोमीत्यन्तेन सन्दर्भेण कर्मफलविभाजकत्वेन ईश्वरानुमानमुपक्षिप्तम् । 'जन्माद्यस्य यतः' (ब्र. सू. १.१.२), 'एतदेवानुमानं * * मन्यन्ते ईश्वरकारणवादिनः' (ब्र. सू. शाङ्करभाष्यं १-१-२); 'कार्यायोजनधृत्यादे'रित्यादि च कुसुमाञ्जलौ (५-१) स्मर्तव्यम् ॥

परमक्रूरहृदयः इत्यनेन ईश्वरे वैषम्यनैर्घृण्यचोदकः पूर्वपक्ष उपन्यस्तः । चतुर्थपौरमुखेनास्य तत्प्रसङ्गस्योत्तरं दत्तम् । धर्माधर्मावनुरुध्य हि सृजति भगवान् । वैषम्यनैर्घृण्ये न, सापेक्षत्वादिति ब्रह्मसूत्रं (१-१-३८) स्मर्तव्यम् ॥

पञ्चमपौरोक्त्या चार्वाकपक्षः ।

'आराममस्य पश्यन्ति न तं पश्यति कश्चन' । इदं बृहदारण्यकोपनिषत् ४-३-१४ ॥

सप्तमः चार्वाकस्यैव रूपान्तरं, यो वैषयिकसुखरसिकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फरफरायते संभ्रमावेगं करोति । अपदानं वीरकर्म; इदं सोल्लुण्ठमुक्तम् ॥

'सर्वथा दुःशक एषः अस्या निरासः ।' अनेन विवेकज्ञानस्य प्रकृति-विमोक्षस्य च कष्टसाध्यता प्रतिपादिता ।

'अत्यद्भुत-पाकविशेषैः', 'पाकपण्डितासि' इत्युभयत्र न केवलं भार्यायास्तस्या अन्न-शाक-भक्ष्यविशेषाणां पाकः, किन्तु पुरुषभोगार्थं प्रवृत्तायाः प्रकृत्याः कर्म-विपाकानुसारं तत्तद्भोगार्थकल्पनं चाभिप्रेतम् ।

'सत्रे भोजनं मठे निद्रा' इति दक्षिणदेशे प्रसिद्धा लोकोक्तिः ।

त्वमपि तैस्तैर्विलसितैर्मत्पुरतो नटित्वा श्रान्तासीति मन्ये । 'रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् । पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥' इत्यत्र सांख्यकारिका (५९) स्मर्तव्या ॥

परिवित्ता ज्येष्ठे ब्रह्मचारिणि, निर्वृत्तविवाहः कनीयान् । अत्र ज्येष्ठपुत्रस्य मातृष्वसृभूतशोणितायाश्च शृङ्गारकथने मनसः रजःपराधीनता ज्ञेया । एवमेव च हस्तिनी-दीर्घश्रवोवृत्तान्ते इन्द्रियोपरि तमःप्रभावः अवगन्तव्यः ।

विटताम् विटवदाचरताम् ।

उपवासशोषणैर्विनयं प्रापय्येत्यनेन न केवलं बाह्यदृष्ट्या दण्डनं, किन्तु आन्तरदृष्ट्या भगवद्भक्तिसाधनानि चोक्तानि ॥

नदीप्रवाहे प्रक्षेप्तुमादिष्टोऽस्मि । अनेन पुण्यतीर्थस्नानरूपं साधनमुक्तम् । क्वचित् प्रयागादिषु तीर्थेषु शरीरपातः तत्त्वावबोधेन विनापि बन्धच्छेदाय भवतीति अभियुक्तोक्तिश्चात्र मन्तव्या ॥

'गृहाद्गृहं प्राणिजातमात्रमत्र धावयित्वा चतुरङ्गं स्वामिना क्रीड्यते ।' अनेन लोकजन्मस्थितिभङ्गा "लोकवत्तु लीलाकैवल्यम्" (ब्रह्मसूत्रं २.१.३३) इत्युक्तप्रकारेण भगवतो लीला इति वेदितव्यम् ॥

तदभाव एव - कैवल्यमेव । 'नान्यः पन्था' इत्यादिकं श्वेताश्वतरवाक्यम् (३.८) । पुत्रा मृता इत्यनेन इन्द्रियाणां सर्वथा दान्तत्वमुक्तम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'सर्वथा नास्ति लोके मूढानां दारिद्यम्' । अत्र विवेकिनं प्रति परिणामव्यापाराद् विरतापि प्रकृतिः, अविवेकिलोकं प्रति सव्यापारैव । अत्र 'कृतार्थं प्रति नष्टमप्यनष्टं, तदन्यसाधारणत्वात्' इति पातञ्जलं सूत्रं (२.२२) स्मर्तव्यम् ॥

अहन्यहनीति श्लोकः शाकुन्तले पञ्चमाङ्के दुष्यन्तवाक्यम् । (६.२६)

'आत्मनात्मानमुद्धरेत्' इति गीता (६-५) । पञ्चकच्छी, कुण्डली एतौ कर्मकाण्डिनां प्रतिनिधी । यज्ञादिकर्मानुष्ठानं, तत्फलतया स्वर्गप्राप्तिश्च तैः दर्शितो मार्गः। एष एव दिव्यमयनम्, सुधामयं सुन्दरीमयमित्यादिना प्रदर्शितम् ॥

'अदृष्टमपि दृष्टवत्' इदं भागवते (११.१९.१८) । 'दृष्टवदानुश्रविकः' इतीश्वरकृष्णोक्तिरपि । 'तम आस्ते तमसा गूढमग्रे'-इदं ऋग्वेदे (१०.१२९.३) । तत्र 'आसीद्' इत्यस्य स्थाने 'आस्ते' इत्यत्रोक्तम् । 'दुर्गः पन्थाः' इत्यनेन 'दुर्गं पथस्तत् कवयो वदन्ति' इति कठोपनिषद्वाक्यं (३-१४) स्मर्तव्यम् ।

'शरीरमाद्यं खलु धर्मसाधनम्' इति कुमारसंभवः (५.३३) । 'अनिर्वेदः श्रियो मूलम्' इत्यादि रामायणे सुन्दरकाण्डे १२ सर्गे १०-तमः श्लोकः, हनूमत उक्तिः ।

गृहप्रवेशपरम्पराव्यथा - पुनरपि जननं पुनरपि मरणमिति संसरणप्रवाहेण प्रोह्यमानत्वम् ॥

वृद्धः - पुराणपुरुषः; 'स पूर्वेषामपि गुरुः' (योगसूत्रं १.२६), 'कविं पुराणमनुशासितारम्' (भ. गी. ८.९) इत्युक्तो भगवानेव ।

'अत्र शर्म समश्नुताम्' इति वाक्यं 'अत्र ब्रह्म समश्नुते' इति कठ-बृहदारण्यकोपनिषद्वाक्यस्य छायाभूतम् । अनेन जीवन्मुक्तिरुपक्षिप्ता वेदितव्या ।

'स्वामिन् अज्ञानात्प्रबलेन' इत्यारभ्य यदिदमुच्यते पत्न्या त्रिवर्णिन्या तत्सर्वं रजस्तमोऽभिभवमतिक्रम्य सत्त्वे प्रतिष्ठितायाः प्रकृतेः वार्ता । 'सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्' इति पातञ्जलं सूत्रं (३.५५) स्मर्तव्यम् ॥

राज्ञस्तव भर्तरि प्रसादसंपादनार्थं सेवां स्वीकुरुष्व इत्यादिना भगवद्भक्त्यङ्गतया तत्सेवादि उक्तम् ।

चन्द्रिकां विवाहयिष्यामीत्यनेन प्रकृतेः सत्त्वमयता उक्ता । 'सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्' इत्युक्तं पतञ्जलिना ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्यामवस्थायामस्याः प्रसन्ना इति नामान्तरकरणं लोके विवाहसमये कान्तायाः प्रेमसूचकं यन्नामान्तरं दीयते तदनुकरोति । शास्त्रदृष्ट्या 'प्रसन्ना' इति नामौचित्यं तु 'प्रसादे सर्वदुःखानां हानिरस्योपजायते । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥' (भ. गी. २.६५) । 'निर्विचारवैशारद्येऽध्यात्मप्रसादः' इति योगसूत्रम् (१.४७) ।

ईशस्त्वमित्यादिना भरतवाक्यच्छलाद् आध्यात्मिकपक्षे प्रहसनस्थपात्रविशेषाणां तात्त्विकभावविवरणं दीयते इति शम् ॥

अस्मिन् संस्कृतरङ्गे ये शिष्याश्च सुहृदश्च मे ।
उत्साहो वर्धतां तेषां कृत्या वृत्त्या च मेऽनया ॥

सूत्रधारश्च साक्षी च यो जगन्नाटयकौतुकी ।
स नाट्ययोगैरस्माकं प्रीयतां परमेश्वरः ॥

गुरुकुल कांगड़ी विश्वविद्यालय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar